# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

# Chapter Thirteen

with the comms. of Śrīdhara, Viśvanātha, and Baladeva

Version 0.1

March 25, 2001

# Chapter 13

# अथ त्रयोदशोऽध्यायः

श्रीभगवानुवाच
इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१ ॥

### श्रीधरः

भक्तानामहमुद्धर्ता संसारादित्यवादि यत् ।
त्रदोशेऽथ तत्सिद्ध्यै तत्त्वज्ञानमुदीर्यते ॥

तेषाम् अहं समुद्धर्ता मृत्यु-संसार-सागरात्, भवामि न चिरात् पार्थ इति पूर्वं प्रतिज्ञातम् । न चात्म-ज्ञानं विना संसाराद्उद्धरणं सम्भवतीति तत्त्व-ज्ञानोपदेशार्थं प्रकृति-पुरुष-विवेकाध्याय आरभ्यते । तत्र यत् सप्तमेऽध्याये अपरा पराअ चेति प्रकृति-द्वयम् उक्तं तयोर् अविवेकाज् जीव-भावम् आपन्नस्य चिद्-अंशस्यायं संसारः । याभ्यां च जीवोपभोगार्थम् ईश्वरस्य सृष्ठ्यादिषु प्रवृत्तिः । तदेव प्रकृति-द्वयं क्षेत्र-क्षेत्रज्ञ-शब्द-वाच्यं परस्परं विविक्तं तत्त्वतो निरूपयिष्यन् भगवान् उवाच इदम् इति । इदं भोगायतनं शरीरं क्षेत्रम् इत्यभिधीयते । संसारस्य प्ररोह-भूमित्वात् । एतद्यो वेत्ति अहं ममेति मन्यते तं क्षेत्रज्ञ इति प्राहुः । कृषीबलवत्तत्-फल-भोक्तृत्वात् । तद्-विदः क्षेत्र-क्षेत्रज्ञयोर् विवेकज्ञाः ॥१ ॥

### विश्वनाथः

नमोऽस्तु भगवद्-भक्त्यै कृपया स्वांश-लेशतः ।
ज्ञानादिष्वपि तिष्ठेत्तत् सार्थकी-करणा यया ॥
षट्के तृतीयेऽत्र भक्त–मिश्रं ज्ञानं निरूप्यते ।
तन्-मध्ये केवला भक्तिर् अपि भङ्ग्या प्रकृष्यते ॥
त्रयोदशे शरीरं च जीवात्म-परमात्मनोः ।
ज्ञानस्य साधनं जीवः प्रकृतिश्च विशिष्यते ॥

तदेवं द्वितीयेन षट्केन केवलयाअ भक्त्या भगवत्-प्राप्तिः । ततोऽन्या अहंग्रहोपासनाद्यास्तिस्र उपासनाश्चोक्ताः । अथ प्रथम-षत्कोदितानां निष्कामकर्म-योगिनां भक्ति-मिश्र-ज्ञाणादेव मोक्षस्तच् च ज्ञानं सङ्क्षेपाद् उक्तम् अपि पुनः क्षेत्र-क्षेत्रज्ञादि-विवेचनेन विवरितुं तृइतीयं षट्कम् आरभते ॥

तत्र किं क्षेत्रं कः क्षेत्रज्ञ इत्यपेक्षायाम् आह इदम् इति । इदं सेन्द्रियं भोगायतनं शरीरं क्षेत्रं संसारस्य प्ररोह-भूमित्वात् । तद्यो वेत्ति बन्ध-दशायाम् अहं-ममेत्य् अभिमन्यमानं स्व-सम्बन्धित्वेनैव जानाति, मोक्ष-दशायाम् अहं-ममेत्य्-अभिमान-रहितः स्व-सम्बन्ध-रहितम् एवयो जानाति, तम् उभयावस्थं जीवं क्षेत्रज्ञम् इति प्राहुः । कृषीबलवत् स एव क्षेत्रज्ञस्तत्-फल-भोक्ता च । यदुक्तं भगवता –

अदन्ति चैकं फलम् अस्य गृध्रा
ग्रामेचरा एकम् अरण्य-वासाः ।
हंसा य एकं बहुरूपम् इज्यैर्
मायामयं वेद स वेद वेदम् ॥ इति । (भाग्. ११.१२.२३)

अस्यार्थः गृध्नन्तीति गृध्रा ग्रामेचरा बद्ध-जीवा अस्य वृक्षस्यकं फलं दुःखम् अदन्ति, परिणामतः स्वर्गादेर् अपि दुःख-रूपत्वात् । अरण्य-वासा हंसा मुक्त-जीवा एक-फलं सुखम् अदन्ति, सर्वथा सुख-रूपस्यापवर्गस्याप्येतज्-जन्यत्वात् । एवम् एकम् अपि संसार-वृक्षं बहुविध-नरक-स्वर्गापवर्ग-प्रापकत्वाद्बहु-रूपं माया-शक्ति-समुद्भूतत्वान् मायामयम् । इज्यैः पूज्यैर् गुरुभिः कृत्वा यो वेदेति तद्-विदः क्षेत्र-क्षेत्रज्ञयोर् वेदितारः ॥१ ॥

**बलदेवः**

कथिताः पूर्वषट्काभ्यामर्थाज्जीवादयोऽत्र ये ।
स्वरूपाणि विशोध्यन्ते तेषां षट्केऽन्तिमे स्फुटम् ॥
भक्तौ पूर्वोपदिष्टायां ज्ञानं द्वारं भवत्यतः ।
देह-जीवेश-विज्ञानं तद्वक्तव्यं त्रयोदशे ॥

आद्यषट्के निष्कामकर्मसाध्यं ज्ञानोपयोगितया दर्शितम् । मध्यषत्के तु भक्तिश-ब्दितं परमात्मोपासनं तन्-महिमनिगदपूर्वकम् उपदिष्टम् । तच् च केवलं तद्-व-श्यताकरं सत्तत्-प्रापकम् । आर्तादीनां तु तम् उपासीनानाम् आर्तिविनाशादिकरं तद्-एकान्ति-प्रसङ्गेन केवलं सत्तत्प्रापकं च ।

योगेन ज्ञानेन चोपसृष्टं त्व् ऐश्वर्य-प्रधान-तद्-रूपोपलम्भकं मोचकं चेत्युक्तम् । तथास्मिन्न् अन्त्य-षत्के प्रकृति-पुरुष-तत्-संयोग-हेतुक-जगत् तद्-ईश्वर-स्व-रूपाणि कर्म-ज्ञान-भक्ति-स्वरूपाणि च विविच्यन्ते । ज्ञान-वैशद्याय एतावत्त्-योगशेऽस्मिन्न् अध्याये देह-जीव-परेश-स्वरूपाणि विवेचनीयानि । देहादि-वि-विक्तस्यापि जीवात्मनो देह-सम्बन्ध-हेतुस्तद्-विवेकानुसन्धि-प्रकारश्च विमर्शनीयः । तदिदम् अर्थजातम् अभिधातुं भगवान् उवाच इदम् इति । हे कौन्तेय इदं सेन्द्रिय-प्राणं शरीरं भोक्तुर् जीवस्य भोग्य-सुख-दुःखादि-प्ररोहकत्वात् क्षेत्रम् इ-त्य् अभिधीयते तत्त्व-ज्ञैः । एतच् छरीरं देवोऽहं मानवोऽहं स्थूलोऽहम् इत्यज्ञैर् आत्म-भेदेन प्रतीयमानम् अपि यः शय्यासनादिवद्-आत्मनो भन्नम् आत्म-भो-ग-मोक्ष-साधनं च वेत्ति, तं वेद्याच् छरीरात् तद्-वेदितृतया भिन्नं तद्-विदः क्षेत्र-क्षेत्रज्ञ-स्वरूप-ज्ञाः क्षेत्रज्ञम् इति प्राहुः । भोग-मोक्ष-साधनत्वं शरीरस्योक्तं श्री-भागवते

> अदन्ति चैकं फलम् अस्य गृध्रा
> ग्रामेचरा एकम् अरण्य-वासाः ।
> हंसा य एकं बहुरूपम् इज्यैर्
> मायामयं वेद स वेद वेदम् ॥ इति । [भाग्. ११.१२.२३]

शरीरात्मवादी तु क्षेत्रज्ञो न, क्षेत्रत्वेम तज्-ज्ञानाभावात् ॥ १ ॥

## क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत
## क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज् ज्ञानं मतं मम ॥ २ ॥

**श्रीधर**: तदेवं संसारिणः स्वरूपम् उक्तम् । इदानीं तस्यैव आरमार्थिकम् असंसारि-स्वरूपम् आह क्षेत्रज्ञम् इति । त च क्षेत्रज्ञं संसारिणं जीवं वस्तुतः स-र्व-क्षेत्रेष्वनुगतं माम् एव विद्धि । तत्त्वम् असि इति श्रुत्या लक्षितेन चिद्-अंशेन मद्-रूपस्योक्तात्वात् आदरार्थम् एव तज्-ज्ञानं स्तौति । क्षेत्र-क्षेत्रज्ञयोर् यदेवं वैलक्षणेयन् ज्ञानं तदेव मोक्ष-हेतुत्वान् मम ज्ञनं मतम् । अन्यत्तु वृथा-पाण्डित्यम् । बन्ध-हेतुत्वादित्यर्थः । तद् उक्तं –

तत्कर्म यन् न बन्धाय
सा विद्या या विमुक्तये ।
आयासायापरं कर्म
विद्यान्या शिल्प-नैपुणम् ॥ इति ।

**विश्वनाथः** एवं क्षेत्र-ज्ञानात् जीवात्मनः क्षेत्रज्ञत्वम् उक्तम्, परमात्मनस्तु ततोऽपि कात्स्न्र्येन सर्व-क्षेत्रज्ञत्वात् क्षेत्रज्ञत्वम् आह क्षेत्रज्ञम् इति । सर्व-क्षेत्रेषु नियन्तृत्वेन स्थितं मां परमात्मानं क्षेत्रज्ञं विद्धि । जीवानां प्रत्येकम् अकैक-क्षेत्र-ज्ञानां तदपि न कृत्स्नम् । मम त्वेकस्यैव सर्व-क्षेत्रज्ञत्वं कृत्स्नम् एवेति विशेषो ज्ञेयः । किं ज्ञानम् इत्यपेक्षायाम् आह क्षेत्रेण सह क्षेत्रज्ञयोर् जीवात्म-परमातनोर् यज् ज्ञानं क्षेत्र-जीवात्म-परमात्मनां यज् ज्ञानम् इत्यर्थः । तदेव ज्ञानं मम मतं सम्मतं च । तत्र -ग्रन्थ-विरोधाद्व्याख्यान्तरेण एकात्मवाद-पक्षो नानुकर्तव्यः ॥ २ ॥

**बलदेवः** क्षेत्र-ज्ञानाज् जीवात्मनः क्षेत्रज्ञत्वम् उक्तम् । अथ परमात्मनस्तदाह क्षेत्रज्ञं चापि माम् इति । हे भारत् सर्व-क्षेत्रेषु मां च क्षेत्रज्ञं विद्धि । अपिर् अवधारणे । जीवाः स्वं स्वं क्षेत्रं स्वभोग-मोक्ष-साधनं जानन्तः क्षेत्रज्ञाः प्रजावत् । अहं तु सर्वेश्वर एक एव सर्वाणि तानि भर्तव्यानि च जानन् तत्-सर्व-क्षेत्रज्ञो राजवदित्यर्थः । सर्वेश्वरस्यापि क्षेत्रेश्वरस्यापि क्षेत्रज्ञत्वं –

क्षेत्राणि हि शरीराणि
बीजं चापि शुभाशुभे ।
तानि वेत्ति स योगात्मा
ततः क्षेत्रज्ञ उच्यते ॥ इत्यादि स्मृतिभ्यः ।

किं ज्ञानम् इत्यपेक्षायाम् आह क्षेत्रेति । क्षेत्रेण सहितौ क्षेत्रज्ञौ जीवपरौ क्षेत्रक्षेत्र-ज्ञौ । तत्सहितयोस्तयोर् मिथो विवेकेन यज्ज्ञानं तदेव ज्ञानं मम मतम् । ततोऽन्यथा त्वज्ञानम् इत्यर्थः ।

इदम् अत्र बोध्यम् — प्रकृति-जीवेश्वराणां भोग्यत्व-भोक्तृत्व-नियन्तृत्व-धर्म-कत्वान् मिथः-सम्पृक्तानाम् अपि तेषां न तत्तद्-धर्म-साङ्कर्यं चित्राम्बर-रूपवदित्य् एवम् आह सूत्रकारः — न तु दृष्टान्त-भावात् इति । श्रुतयश्च प्रकृत्य्-आदीनां विविक्त-तद्-धर्मकताम् आहुः१ —

पृथग् आत्मानं प्रेरितारं च मत्वा
जुष्टस्ततस्तेनामृतत्वम् एति । [श्वेत्. उप्. १.६]

ज्ञाज्ञौ द्वावजावीशानीशानावजा
ह्येका भोक्तृ-भोगार्थ-युक्तौ । [श्वेत्. उप्. १.९]

क्षरं प्रधानम् अमृताक्षरं हरः
क्षरात्मानावीशते देव एकः । [श्वेत्. उप्. १.१०]

भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्मम् एतत् । [श्वेत्. उप्. १.१२]

अजाम् एकाम् लोहित-शुक्ल-कृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्त-भोगां अजोऽन्यः ॥ [श्वेत्. उप्. ४.५]

प्रधान-क्षेत्रज्ञ-पतिर् गुणेशः ।इत्यादयः । [श्वेत्. उप्. ६.१६]

अत्रापि क्षराक्षर-शब्द-बोध्यात् क्षेत्र-क्षेत्रज्ञ-रूपाद् युगलात् स्वस्य पुरुषोत्तमस्यान्यत्वं वक्ष्यति द्वाविमौ पुरुषौ इत्यादिभिस्तस्मान् मिथः सम्पृक्तानाम् अपि प्रकृत्यादीनां विविक्ततया ज्ञानं तात्त्विकम् इति ।

यत्त्वैकात्मवादिनः क्षेत्रज्ञ्ञं चापि मां विद्धि इत्यत्र सामानाधिकरण्य-प्रतीत्या सर्वेशरसैव सतोऽस्या विद्ययैव क्षेत्रज्ञ-भावो रज्जोर् इव भुजङ्गमत्वम् । तन्-निवृत्तये हरेर् आप्ततमस्येदं वाक्यं क्षेत्रज्ञं चापि माम् इति रज्जुर् इयं न भुजङ्ग इत्याप्तवाक्याद्भुजङ्गत्व-भ्रान्तिर् इव क्षेत्रज्ञत्व-भ्रान्तिर् अस्माद्वाक्याद्विनश्यतीत्याहुस्तत् किलोपदेश्यास्म्भवादेव निरस्तम् इति देहिनोऽस्मिन् इत्यस्य भाष्ये दृष्टव्यम् । एवं तु व्याख्यातं युज्यते । च-शब्दः क्षेत्र-समुच्चयार्थः । क्षेत्रं क्षेत्रज्ञं च माम् एव विद्धि ।मद्-अधीन-स्थिति-प्रवृत्तिकत्वान् मद्-व्याप्यत्वाच् च मद्-आत्मकं जानीहीति । एवम् एवोक्तं क्षेत्र-क्सेत्रज्ञयोर् इति । तयोर् मद्-अधीन-प्रवृत्तिकत्वादिभिर् मद्-आत्मकतया यज्-ज्ञानं तज् ज्ञानं मम मतम् इतोऽन्यथा त्वमतम् इति ।

**तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ।**
**स च यो यत्प्रभावश्च तत् समासेन मे शृणु ॥ ३ ॥**

**श्रीधर**: तत्र यद्यपि चतुर्विंशत्या भेदैर् भिन्ना प्रकृतिः क्षेत्रमित्याभिप्रेतं तथापि देह-रूपेण परिणतायामेव तस्यामहं-भावेनाविवेकः स्फुट इति ।तद्-विवेकार्थमिदं

शरीरं क्षेत्रमित्याद्युक्तम् । तदेतत् प्रपञ्चयिष्यन् प्रतिजानीते तदिति । यदुक्तं मया क्षेत्रं तत्क्षेत्रं यत् स्वरूपतो जडं दृश्यादि-स्वभावाम् । यादृग् यादृशं च इच्छादि-धर्मकम् । यद्-विकारि यैर् इन्द्रियादि-विकारैर् युक्तम् । यतश्च प्रकृति-पुरुष-संयोगाद् भवति । यदिति यैः प्रकारैः स्थावर-जङ्गमादि-भेदैः, भिन्नम् इत्यर्थः । स च क्षेत्रज्ञो यत्-स्वरूपो यत्-प्रभावश् च अचिन्त्यैश्वर्य-योगेन यैः प्रभावैः सम्पन्नः तं सर्वं सङ्क्षेपेतो मत्तः शृणु ॥ ३ ॥

**विश्वनाथः** सङ्क्षेपेणोक्तम् अर्थं विवरितुम् आरभते तत् क्षेत्रं शरीरं यच् च महाभूत-प्राणेन्द्रियादि-सङ्घात-रूपम् । यादृक् यादृशेच्छादि-धर्मकम् । यद्विकारि वैरि-प्रियादि-विकारैर् युक्तम् । यतश्च प्रकृति-पुरुष-संयोगादुद्भूतम् । यदिति यैः स्थावर-जङ्गमादि-भेदैर् भिन्नम् इत्यर्थः । स क्षेत्रज्ञो जीवात्मा परमात्मा च । यत्तदिति नपुंसकम् अनपुंसकेन्नैकवच् चेति एक-शेषः । समासेन सङ्क्षेपेण ॥ ३ ॥

**बलदेवः** सङ्क्षेपेणोक्तम् अर्थं विशदयितुम् आह तदिति । तत् क्षेत्रं शरीरं यच् च यद्द्रव्यं यादृक् यद्-आश्रय-भूतं यद्-विकारि यैर् विकारैर् उपेतं । यतश्च हेतोर् उद्भूतं यत् प्रयोजनकं च । यदिति यत् स्वरूपं । स च क्षेत्रज्ञो जीव-लक्षणः परेश-लक्षणश्च यो यत् स्वरूपो य-प्रभावो यच्-छक्तिकश्च । नपुंसकम् अनपुंसकेनैकव् चास्यान्यत्रस्याम् इति सूत्रात् ॥ ३ ॥

> **ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।**
> **ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥**

**श्रीधरः** कैर् विस्तरेणोक्तस्यायं सङ्क्षेप इत्य् अपेक्षायाम् आह ऋषिभिर् इति । ऋषिभिर् वशिष्ठादिभिः । योग-शास्त्रेषु ध्यान-धारणादि-विषयत्वेन विराजादिरूपेण बहुधा गीतं निरूपितम् । विविधैर् विचित्रैर् नित्य-नैमित्तैक-काम्य-कर्मादि-विषयैः । छन्दोभिर् वेदैः । नाना-यजनीय-देवतादि-रूपेण बहुधा गीतम् । ब्रह्मणः सूत्रैः पदैश्च । ब्रह्म सूत्र्यते सूच्यते एभिर् इति ब्रह्म-सूत्राणि । यतो वा इमानि भूतानि जायन्ते इत्यादीनि तटस्थ-लक्षण-पराण्युपनिषद्-वाक्यानि । तथा च ब्रह्म पद्यते गम्यते साक्षाज् ज्ञायत एभिर् इति पदानि स्वरूप-लक्षण-पराणि सत्यं ज्ञानम् अनन्तं ब्रह्म इत्य् आदीनि । तैश्च बहुधा गीतम् । किं च हेतुमद्भिः सदेव सम्येदम् अग्र आसीत् कथम् असतः सज् जायेत इति । तथा को ह्य् एवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्य् एवानन्दयति इत्यादि युक्तिमद्भिः । अन्यादपान-चेष्टां कः कुर्यात् । प्राण्यात् प्राण-व्यापारं वा कः कुर्यात् इति श्रुति-पदयोर् अर्थः । विनिश्चितैर् उपक्रमोपसंहारैकवाक्यतया 'सन्दिग्धार्थ-प्रतिपादकैर् इत्य् अर्थः । तदेवम् एतैर् विस्तरेणोक्तं दुःसङ्ग्रहं सङ्क्षेपतस् तुभ्यं कथयिष्यामि ।

तच् छृण्वित्यर्थः ।यद्वा अथातो ब्रह्म-जिज्ञासा इत्यादीनि ब्रह्म-सूत्राणि गृह्यन्ते । तान्येव ब्रह्म पद्यते निश्चीयते एभिर् इति पदानि ।तैर् हेतुमद्भिः ईक्षते नाशब्दम्, आनन्दमयोऽभ्यासात् इत्यादिभिर् युक्तिमद्भिर् विनिश्चितैर् इत्यर्थः ।शेषं समानम् ॥ ४ ॥

**विश्वनाथ**ः कैर् विस्तरेणोक्तस्यायं सङ्क्षेप इत्यपेक्षायाम् आह ऋषिभिर् वशिष्ठादिभिर् योग-शास्त्रेषु । छन्दोभिर् वेदैः । ब्रह्म-सूत्राणि अथातो ब्रह्म-जिज्ञासा इत्य् आदीनि तान्येव सूत्राणि ।ब्रह्म पद्यते ज्ञायते एभिर् इति तानि । तथा तैः कीदृशैर् हेतुमद्भिः । ईक्षते नाशब्दम्, आनन्दमयोऽभ्यासात् इति युक्तिमद्भिर् विनिश्चितैर् विशेषतो निश्चितार्थैः ॥ ४ ॥

**बलदेव**ः इदं क्षेत्र-क्षेत्रज्ञ-याथात्म्यं कैर् विस्तरेणोक्तं यत् समासेन ब्रूष इत्यपेक्षायाम् आह ऋषिभिर् इति । ऋषिभिः पराशरादिभिर् एतत् क्षेत्रादि-स्वरूपं बहुधा गीतम्

> अहं त्वं च तथान्ये भूतैर् उह्याम पार्थिव ।
> गुण-प्रवाह-पतितो भूत-वर्गोऽपि यात्ययम् ॥
> कर्म-वश्या गुणा ह्येते सत्त्वाद्याः पृथिवी-पते ।
> अविद्या-सञ्चितं कर्म तच् चाशेषेषु जन्तुषु ॥
> आत्मा शुद्धोऽक्षरः शान्तो निर्गुणः प्रकृतेः परः ।
> प्रवृद्ध्-अपचयौ नास्य एकस्याखिल-जन्तुषु ॥ [वि. पु. २.१३.६९]

इत्यादिभिः । तथा छन्दोभिर् वेदैर् विविधैर् सर्वैर् बहुधा तद्गीतं यजुः-शाखायां तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः इत्यादिना ब्रह्म पुच्छं प्रतिष्ठा इत्य् अन्तेनान्नमय-प्राण-मय-मनोमय-विज्ञानमयानन्दमयाः पञ्च पुरुषाः पठितास्तेष्वन्नमयादित्रयं जडं क्षेत्र-स्वरूपं, ततो भिन्नो विज्ञानमयो जीवस्तस्य भोक्तेति जीव-क्षेत्रज्ञ-स्वरूपं ।तस्माच् च भिन्नः सर्वान्तर आनन्दमय इतीश्वर-क्षेत्रज्ञ-स्वरूपम् उक्तम् ।एवं वेदान्तरेषु मृग्यम् ।ब्रह्म-सूत्र-रूपैः पदैर् वाक्यैश्च तद्-याथात्म्यं गीतम् ।तेषु न वियदश्रुतेः इत्यादिना क्षेत्र-स्वरूपं, नात्मा श्रुतेः इत्यादिना जीव-स्वरूपं, परात् तु तच् छ्रुतेः इत्यादिनेश्वर-स्वरूपम् ।स्फुटम् अन्यत् ॥

> **महाभूतान्यहंकारो बुद्धिरव्यक्तम् एव च ।**
> **इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥ ५ ॥**
> **इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।**
> **एतत् क्षेत्रं समासेन सविकारम् उदाहृतम् ॥ ६ ॥**

**श्रीधरः** तत्र क्षेत्र-स्वरूपम् आह महाभूतानीति द्वाभ्याम् । महा-भूतानि भूम्य्-आदीनि पञ्च । अहङ्कारस् तत्-कारण-भूतः । बुद्धिर् विज्ञानात्मकं महत्-तत्त्वम् । अव्यक्तं मूल-प्रकृतिः । इन्द्रियाणि दश बाह्यानि ज्ञान-कर्मेन्द्रियाणि । एकं च मनः । इन्द्रिय-गोचराश्च पञ्च तन्-मात्र-रूपा एव शब्दादय आकाशादि-विशेष-गुणतया व्यक्ताः सन्त इन्द्रिय-विषयाः पञ्च तदेवं चतुर्विंशति-तत्त्वानि उक्तानि ॥ ५ ॥

इच्छेति । इच्छादयः प्रसिद्धाः । सङ्घातः शरीरम् । चेतना ज्ञानात्मिका मनो-वृत्तिः । धृतिर् धैर्यम् । एते चेच्छादयो दृश्यत्वान् नात्म-धर्माः, अपि तु मनो-धर्मा एव । अतः क्षेत्रान्तःपातिन एव । उपलक्षणं चैतत् सङ्कल्पादीनाम् । तथा च श्रुतिः – कामः सङ्कल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिर् अधृतिर् ह्रीर् धीर् भीर् इत्येतत् सर्वं मन एव इति । अनेन च यादृग् इति प्रतिज्ञाताः क्षेत्र-धर्मा दर्शिताः । एतत् क्षेत्रं सविकारम् इन्द्रियादि-विकार-सहितं सङ्क्षेपेण तुभ्यं मयोक्तम् इति क्षेत्रोपसंहारः ॥ ६ ॥

**विश्वनाथः** तत्र क्षेत्रस्य स्वरूपम् आह महाभूतान्याकाशादीन्यहङ्कारस्तत्-कारणम् । बुद्धिर् विज्ञानात्मकं महत्-तत्त्व, अहङ्कार-कारणम् । अव्यक्तं प्रकृतिर् महत्-तत्त्व-कारणम् । इन्द्रियाणि श्रोत्रादीनि दशैकं च मनः । इन्द्रिय-गोचराः पञ्च शब्दादयो विषयास् तदेवं चतुर्विंशति-तत्त्वात्मकम् इति । इच्छादयः प्रसिद्धाः । सङ्घातः पञ्च-महाभूत-परिणामो देहः । चेतना ज्ञानात्मिका मनो-वृत्तिर् धृतिर् धैर्यम् इच्छादयश्चैते मनो-धर्मा एव न त्वात्म-धर्माः । अतः क्षेत्रान्तःपातिन एव । उपलक्षणं चैतत् सङ्कल्पादीनाम् । तथा च श्रुतिः – कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिर् ह्रीर् धीर् भीर् इत्य् एतत् सर्वं मन एव इति । अनेन यादृग् इति प्रतिज्ञाताः क्षेत्र-धर्मा दर्शिताः । एतत् क्षेत्रं सविकारं जन्मादि-षड्विकार-सहितम् ॥ ५-६ ॥

**बलदेवः** तत् क्षेत्रं यच् च इत्याद्यार्धकेन वक्तुं प्रतिज्ञातं क्षेत्र-स्वरूपम् आह – महाभूतानीति द्वाभ्याम् । महाभूतानि पञ्च खादीन्यहङ्कारस्तद्-धेतुस् तामसो भूतादि-संज्ञो बुद्धिस्तद्-धेउत्र् ज्ञान-प्रधानो महान् अव्यक्तं तद्-धेतुः । त्रिगुणावस्थं प्रधानम् इन्द्रियाणि श्रोत्रादीनि पञ्च वाग्-आदीनि च पञ्चेति भूतादि-खाद्य्-अन्तरालिकाः सूक्ष्माः शब्दादि-तन्मात्राः खादि-विशेष-गुणतया व्यक्ताः सन्तः स्थूलाः श्रोत्रादि-पञ्चक-ग्राह्या विषया इत्यर्थः । एवं चतुर्विंशति-तत्त्वात्मकं क्षेत्रं ज्ञेयम् । इच्छादयश् चत्वारः प्रसिद्धाः सङ्कल्पादीनाम् उपलक्षणम् एतत् । एते मनोधर्माः कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिर् ह्रीर् धीर् भीर् इति श्रुतेः । यद्यप्यात्म-धर्मा इच्छादयो य आत्मा इत्यादौ सत्य-कामः सत्य-सङ्कल्पः इति श्रवणात्, पठेद्य इच्छेत् पुरुषः इति सहस्रनाम-स्तोत्रात्, पुरुषः सुख-दुःखानां भोक्तृत्वे हेतुर् उच्यते इति वक्ष्यमाणाच् च, तथापि मनो-द्वाराभिव्यक्तेर् मनोधर्मत्वम् । अतः

क्षेत्रान्तःपातः ।सङ्घातो भूत-परिणामो देहः ।स च चेतना धृइत्र् भोगाय मोक्षाय च यतमानस्य चेतनस्य जीवस्याधारतयोत्पन्न इत्यर्थः । अत्र प्रधानादि-द्रव्याणि क्षेत्रारम्भकाणिति, य चेत्यस्य श्रोत्रादीन्दिरियाणि श्रोत्राश्रितानीति यादृग् इत्यस्ये-न्च्छादीनि क्षेत्र-कार्याणीति ।यद्-विकारीत्यस्य चेतना धृतिर् इति ।यतश्चेत्यस्य सङ्घात इति ।यदित्यसोत्तरम् उक्तम् ।एतत् क्षेत्रं सविकारं जन्मादि-षड्-विकारोपेतम् उदाहृतम् उक्तम् ॥५-६ ॥

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७ ॥
इन्द्रियार्थेषु वैराग्यम् अनहंकार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥८ ॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यं च समचित्तत्वम् इष्टानिष्टोपपत्तिषु ॥९ ॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
विविक्तदेशसेवित्वम् अरतिर्जनसंसदि ॥१० ॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥११ ॥

**श्रीधरः** इदानीम् उक्त-लक्षणात् क्षेत्रात् अतिरिक्ततया ज्ञेयं शुद्धं क्षेत्रज्ञं वि-स्तरेण वर्णयिष्यन् शुद्ध-ज्ञान-साधनान्याह अमानित्वम् इति पञ्चभिः ।अमानित्वं स्व-गुण-श्लाघा-राहित्यम् ।अदम्भित्वं दम्भ-राहित्यम् ।अहिंसा पर-पीडा-व-र्जनम् ।क्षान्तिः सहिष्णुत्वम् ।आर्जवम् अवक्रता ।आचार्योपासनं सद्-गुरु-सेवा ।शौचं बाह्य आभ्यन्तरं च ।तत्र बाह्यं मृज्-जलादिना, आभ्यन्तरं च रागादि-मल-क्षालनम् ।तथा च श्रुतिः –

शौचं च द्विविधं प्रोक्तं
बाह्यम् अभ्यन्तरं तथा ।
मृज्-जलाभ्यां स्मृतं बाह्यं
भाव-शुद्धिस्तथान्तरम् ॥इति ।

धैर्यं सन्-मार्गे प्रवृत्तस्य तद्-एक-निष्ठता ।आत्म-विनिग्रहः शरीर-संयमः । एतज् ज्ञानम् इति प्रोक्तम् इति पञ्चमेनान्वयः ॥किं च मयीति ।मयि परमेश्वरे ।

अनन्य-योगेन सर्वात्म-दृष्ट्या ।अव्याभिचारिण्येकान्ता भक्तिः ।विविक्तः शुद्ध-चित्त-प्रसाद-करः ।तं देशं सेवितुं शीलं यस्य तस्य भावस्तत्त्वम् ।प्राकृतानां जनानां संसदि साभायाम् अरती रत्य्-अभावः ।किं च अध्यात्मेति ।आत्मानम् अधिकृत्य वर्तमानं ज्ञानम् अध्यात्म-ज्ञानम् । तस्मिन् नित्यत्वं नित्य-भावः । तत्त्वं पदार्थ-बुद्धि-निष्ठत्वम् इत्यर्थः ।तत्त्व-ज्ञानस्यार्थः प्रयोजनं मोक्षस्तस्य दर्शनं मोक्षस्य सर्वोत्कृष्टत्वालोचनम् इत्यर्थः ।एतदमानित्वम् अदम्भित्वम् इत्यादि विंशति-सङ्ख्यकं यदुक्तम् एतज् ज्ञानम् इति प्रोक्तं वशिष्ठादिभिः ज्ञान-साधनत्वात् ।अतोऽन्यथास्माद् विपरीतं मानित्वादि यत् तदज्ञानम् इति प्रोक्तम् ।ज्ञान-विरोधित्वात् अतः सर्वथा त्याज्यम् इत्यर्थः ॥ ७-११ ॥

**विश्वनाथ**: उक्त-लक्षणात् क्षेत्राद् विविक्ततया ज्ञेयौ जीवात्म-परमात्मानौ क्षेत्रज्ञौ विस्तरेण वर्णयिष्यन् तज्-ज्ञानस्य साधनान्यमानित्वादीनि विंशतिम् आह पञ्चभिः ।अत्राष्टदश भक्तानां ज्ञानिनां च साधारणानि किन्तु भक्तैः मयि चानन्य-योगेन भक्तिर् अव्यभिचारिणी इत्येकम् एव भगवद्-अनुभव-साधनत्वेन यत्नतः क्रियते । अन्यानि स्पतदशोक्ताभ्यासवतां तेषां स्वत एवोत्पद्यन्ते न तु तेषु यत्न इति साम्प्रदायिकाः ।अन्तिमे द्वे तु ज्ञानिनाम् असाधारण एव ।

अत्रामानित्वादीनि विस्पष्टार्थानि ।शौचं बाह्यम् अभ्यन्तरं च तथा च स्मृतिः –

शौचं च द्विविधं प्रोक्तं
बाह्यम् अभ्यन्तरं तथा ।
मृज्-जलाभ्यां स्मृतं बाह्यं
भाव-शुद्धिस्तथान्तरम् ॥ इति ।

आत्म-विनिग्रहः शरीर-संयमः ।जन्मादिषु दुःख-रूपस्य दोषस्यानुदर्शनं पुनः पुनः पर्यालोचनम् ।असक्तिः पुत्रादिषु प्रीत्-त्यागोऽनभिष्वङ्गः पुत्रादीनां सुखे दुःखे चाहम् एव सुखी दुःखीत्यध्यासाभाव इष्टानिष्टयोर् व्यवहारिकयोर् उपपत्तिषु प्राप्तिषु नित्यं सर्वदा समचित्तत्वम् ।मयि श्यामसुन्दराकारेऽनन्य-योगेन ज्ञान-कर्म-तपो-योगाद्य्-अमिश्रणेन भक्तिश्च-काराद् ज्ञानादि-मिश्रण-प्राधान्येन च ।आद्या भक्तैर् अनुष्ठेया द्वितीया ज्ञानिभिर् इति केचिद्, अन्ये त्वनन्या भक्तिर् यथा-प्रेम्णः साधनं तथा परमात्मानुभवस्यापीति ज्ञापनार्थम् अत्र षड्केऽप्युक्तिर् इति भक्ता व्याचक्षते । ज्ञानिनस्त्वनन्येनैव योगेन सर्वात्म-दृष्ट्येति । अव्यभिचारिणी प्रतिदिनम् एव कर्तव्या ।केनापि निवारयितुम् अशक्या इति मधुसूदन-सरस्वती-पादाः । आत्मानम् अधिकृत्य वर्तमाणं ज्ञानम् अध्यात्म-ज्ञानम् ।तस्य नित्यत्वं नित्यानुष्ठेयत्वं पदार्थ-शुद्धि-निष्ठत्वम् इत्यर्थः ।तत्त्व-ज्ञानस्यार्थः प्रयोजनं मोक्षस्तस्य दर्शनं स्वाभीष्टत्वेनालोचनम् इत्यर्थः ।एतद्विंशतिकं ज्ञानं साधारण्येन जीवात्म-परमात्मनोर्

ज्ञानस्य साधनम् । असाधारणं परमात्म-ज्ञानं त्वग्रे वक्तव्यम् । ततोऽन्यथास्माद्वि-परीतं मानित्वादिकम् ॥ ७-११ ॥

**बलदेव**ः अथोक्तात् क्षेत्राद्विभिन्नत्वेन ज्ञेयं क्षेत्रज्ञ-द्वयं विस्तरेण निरूपयिष्यन् तज्-ज्ञान-साधनान्यमानित्वादीनि विंशतिम् आह पञ्चभिः । अमानित्वं स्व-सत्कारानपेक्षत्वम् । अदम्भित्वं धार्मिकत्व-खाति-फलक-धर्माचरण-विरहः । अहिंसा परापीडनम् । क्षान्तिर् अपमान-सहिष्णुता । आर्जवम् च्छद्मिष्व् अपि सारल्यम् । आचार्योपासनं ज्ञान-प्रदस्य गुरोर् अकैतवेन संसेवनम् । शौचं बाह्याभ्यन्तर-पावित्र्यम् ।

> शौचं च द्विविधं प्रोक्तं
> बाह्यम् अभ्यन्तरं तथा ।
> मृज्-जलाभ्यां स्मृतं बाह्यं
> भाव-शुद्धिस्तथान्तरम् ॥ इति स्मृतेः ।

स्थैर्यं सद्-वर्त्मैक-निष्ठत्वम् । आत्म-विनिग्रहः आत्मानुसन्धि-प्रतीपाद्विषयान् मनसो नियमनम् । इन्द्रियार्थेषु शब्दादि-विषयेषु प्रतीपेषु वैराग्यं रुच्य्-अभावः । अहनङ्कारो देहादिष्वात्माभिमान-त्यागः । जन्मादिषु दुःखरूपस्य दोषस्यानुदर्शनं पुनः पुनश्चिन्तनम् । पुत्रादिषु परमार्थ-प्रतीपेष्वसक्तिः पीति-त्यागः । अनभिष्वङ्गस्तेषु सुखिषु दुःखिषु च सत्सु तत्-सुख-दुःखानभिनिवेशः । इष्टानिष्टानाम् अनुकूल-प्रतिकूलानाम् अर्थानाम् उपपत्तिषु प्राप्तिषु समचित्तत्वं हर्ष-विषाद-विरहः । नित्यं सर्वदा ।

मयि परमेशेऽव्याभिचारिणी स्थिरा भक्तिः श्रवणाद्या । अनन्य-योगेनैकान्तित्वेन मद्-भक्त-सेवा । तथा विविक्त-देश-सेवित्वं निर्जन-स्थान-प्रियता जनानां ग्राम्याणां संसदि रति-त्यागः । अध्यात्मम् आत्मनि यज् ज्ञानं तस्य नित्यत्वं सर्वदा विमृश्यत्वम् । तत्त्वं त्वहं परं ब्रह्म वदन्ति तत्त्व-विदस्तत्त्वं यज् ज्ञानम् अद्वयम् इत्य् आदि स्मृतेः । तज् ज्ञानस्य योऽर्थस्तत्-प्राप्ति-लक्षणस्तस्य दर्शनं हृदि स्मरणम् । एतदमानित्वादिकं ज्ञानं परम्परया साक्षाच् च तद्-उपलब्धि-साधनं प्रोक्तम् । ज्ञायते उपलभ्यतेऽनेन इति व्युत्पत्तेः । यत् ततोऽन्यथा विपरीतं मानित्वादि तदज्ञानं तद्-उपलब्धि-विरोधीति ॥ ७-११ ॥

**ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वामृतम् अश्नुते ।**
**अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥**

**श्रीधरः** एभिः साधनैर् यज् ज्ञेयं तदाह ज्ञेयम् इति षड्भिः । यज् ज्ञेयं तत् प्रवक्ष्यामि । श्रोतुर् आदर-सिद्धये ज्ञान-फलं दर्शयति । यद्वक्ष्यमाणं ज्ञात्वामृतं मोक्षं प्राप्नोति । किं तत् अनादिमत् । आदिमन् न भवति इति अनादिमत् । परं निरतिशयं ब्रह्म । अनादि इत्य् एतावतैव बहुव्रीहिणानादिमत्त्वे सिद्धेऽपि पुनर् मतुपः प्रयोगश्छान्दसः । यद्वा अनादीति मत्-परम् इति च पद-द्वयम् । मम् विष्णोः परं निर्विशेषं रूपं ब्रह्मेत्यर्थः । तद् एवाह न सन् तन् नासदुच्यते । विधि-मुखेन प्रमाणस्य विषयः सच्-छब्देनोच्यते । निषेधस्य विषयस्त्वसच्-छब्देनोच्यते । इदं तु तद्-उभय-विलक्षणम् । अविषयत्वादित्यर्थः ॥ १२ ॥

**विश्वनाथः** एवं साधनैर् ज्ञेयो जीवात्मा परमात्मा च । तत्र परमात्मैव सर्वगतो ब्रह्म-शब्देनोच्यते । तच् च ब्रह्म निर्विशेषं सविशेषं च क्रमेण ज्ञानि-भक्तयोर् उपास्यम् । देहगतोऽपि चतुर्भुजत्वेन ध्येयः परमात्म-शब्देनोच्यते । तत्र प्रथमं ब्रह्माह ज्ञेयम् इति । अनादि न विद्यते आदिर् यस्य मत्-स्वरूपत्वान् नित्यम् इत्यर्थः । मत्-परम् अहम् एव पर उत्कृष्ट आश्रयो यस्य तत् । ब्रह्मणो हि प्रतिष्ठाहम् इति मद्-अग्रिमोक्तेः । तदेव किम् इत्यपेक्षायाम् आह । तद्ब्रह्म न सत् नाप्यसत्, कार्य-कारणातीतम् इत्य् अर्थः ॥ १२ ॥

**बलदेवः** एवं ज्ञान-साधनान्युपदिश्य तैर् ज्ञेयम् उपदिशति ज्ञेयं यत् तदिति । उक्तैः साधनैर् यज् ज्ञेयम् उपलभ्यं जीवात्मवस्तु च तदहं प्रकर्षेण सुबोधतया वक्ष्यामि यज् ज्ञात्वा जनोऽमृतं मोक्षम् अश्नुते लभते । तत्र जीवात्म-वस्तूपदिशति अनादीत्य्-अर्धकेन । नास्त्य् आदिर् यस्य तत् जीवस्याद्य-उत्पत्तिर् नास्त्यतोऽनोत्'पि नेति नित्यासावित्यर्थः । एवम् आह श्रुतिः – न जायते म्रियते वा विपश्चित् इत्याद्या । अहम् एव परः स्वामी यस्य तत् प्रधान-क्षेत्रज्ञ-पतिर् गुणेशः इति श्रुतेः । दासभूतो हरेर् एव नान्यस्यैव कदाचन इति स्मृतेश्च । अपहत-पाप्मत्वादिना ब्रह्म बृहता गुणाष्टकेन विशिष्टम् । श्रुतिश्चैवम् आह य आत्मापहत-पाप्मा विजरो विमृत्युर् विशोको विज्घित्सोऽपिपासः सत्य-सङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः इति । जीव ब्रह्म-शब्दस्तु विज्ञातं ब्रह्म चेद्वेद इत्यादि श्रुतेः । स गुणान् समतीत्यैतान् ब्रह्म-भूयाय कल्पते । ब्रह्म-भूतः प्रसन्नात्मा न शोचिअति न काङ्क्षति इति वक्ष्यमाणाच् च । न सदिति तद्विशुद्धं जीवात्म-वस्तु कार्य-कारणात्मकावस्था-द्वय-विरहात् सच् चासच् च नोच्यते । किन्तु परमाणु-चैतन्यं गुणाष्टक-विशिष्टम् उच्यते - विभक्त-नाम-रूपं कार्यावस्थं सद्-उपमृदित-नाम-रूपं कारणावस्थं त्वसद् इत्यर्थः ॥ १२ ॥

सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

**श्रीधर** : नन्वेवं ब्रह्मणः सद्-असद्-विलक्षणत्वे सति – सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वम् इत्य् आदि-श्रुतिभिर् विरुध्येत इत्याशङ्क्य परास्य शक्तिर् विविधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च इत्यादि श्रुति-प्रसिद्धयाचिन्त्य-शक्त्या स-र्वात्मतां तस्य दर्शयन्न् आह सर्वत इति पञ्चभिः । सर्वतः सर्वत्र पाणयः पादाश् च यस्य तत् । सर्वतोऽक्षीणि शिरांसि मुखानि च यस्य तत् । सर्वतः श्रुतिमत् श्रवणेन्द्रियैर् युक्तं सल्-लोके सर्वम् आवृत्य व्याप्य तिष्ठति । सर्व-प्राणि-वृत्तिभिः पाण्य्-आदिभिर् उपाधिभिः सर्व-व्यवहारास्पदत्वेन तिष्ठतीत्यर्थः ॥१३ ॥

**विश्वनाथ** : नन्वेवं ब्रह्मणः सद्-असद्-विलक्षणत्वे सति — सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं सर्वम् इत्यादि-श्रुतिर् विरुध्येत इत्याशङ्क्य स्वरूपतः कार्य-कारणातीत-त्वेऽपि शक्ति-शक्तिमतोर् अभेदात् कार्य-कारणात्मकम् अपि तदित्याह सर्वत एव पाणयः पादाश्च यस्य तत् । ब्रह्मादि-पिपीलिकान्तानां पाणि-पाद-वृन्दैः सर्वत्र दृ-ष्टैर् एव तद् ब्रह्मैवासङ्ख्य-पाणि-पादैर् युक्त्म् इत्यर्थः । एवम् एव सर्वतोऽक्षीत्यादि ॥१३ ॥

**बलदेव** : अथ परमात्म-वस्तूपदिशति सर्वतः पाणीति । तत् परमात्मवस्तु । सर्वतः पाणि-पादम् इत्यादि विस्फुटार्थम् ॥१३ ॥

**सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।**
**असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृच ॥१४ ॥**

**श्रीधर** : किं चसर्वेन्द्रियेति । सर्वेषां चक्षुर्-आदीनां गुणेषु रूपाद्य्-आकारासु वृत्तिषु तत्-तद्-आकारेण भासते इति तथा । सर्वेन्द्रियाणि गुणांश्च तत्-तद्-वि-षयान् आभासयतीति वा । सर्वैः इन्द्रियैर् विवर्जितं च । तथा च श्रुतिः — अपाणि-पादो जवनो ग्रहीता पश्यत्य् अचक्षुः स शृणोत्यकर्णः इत्यादिः । असक्तं सङ्ग-शून्यम् । तथापि सर्वं बिभर्तीति सर्वस्याधारभूतम् । तदेव निर्गुणं सत्त्वादि-गुण-रहितं । गुण-भोक्तृ च गुणानां सत्त्वादीनां भोक्तृ पालकम् ॥१४ ॥

**विश्वनाथ** : किं च सर्वाणि इन्द्रियाणि गुणान् इन्द्रिय-विषयांश्च आभासयतीति तच् चक्षुषश्चक्षुः इत्यादि श्रुतेः । यद्वा सर्वेन्द्रियैर् गुणैः शब्दादिभिश् चाभासते विरा-जतीति तत् । तदपि सर्वेन्द्रिय-विवर्जितं प्राकृतेन्द्रियादि-रहितम् । तथा च श्रुतिः — अपाणि-पादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः इत्यादि । परास्य शक्तिर् बहुधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च इति श्रुति-प्रसिद्ध-स्वरू-प-शक्त्यास्पदत्वादिति भावः । असक्तं आसक्ति-शून्यं सर्वभृत् श्री-विष्णु-स्वरूपेण सर्व-पालकम् । निर्गुणं सत्त्वादि-गुण-रहिताकारम् । किं च गुण-भोक्तृ त्रिगुणाती-त-भग-शब्द-वाचा षड्-गुणास्वादकम् ॥१४ ॥

**बलदेव**: किं च सर्वेति सर्वैर् इन्द्रियैर् गुणैश्च तद्-वृत्तिभिर् आभासते दीप्यत इति तथा सर्वैर् इन्द्रियैर् जीवेन्द्रियवत् स्वरूप-भिन्नैर् विवर्जितं सन्त्यक्तं प्राकृतैः करणैः शून्यः स्वरूपानुबन्धिभिस्तैर् विशिष्टो हरिर् इति स्वीकार्यम् । अपाणि-पादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । यदात्मको भगवांस् तद्-आत्मिका व्यक्तिः किम् आत्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकश्चेति बुद्धिमनोऽङ्ग-प्रत्यङ्गवत्तां भगवतो लक्षयामहे बुद्धिमान् मनो-बाणङ्ग-प्रत्यङ्गवान् इति श्रुतेः । सर्वभृत् सर्व-तत्त्व-धारकम् अप्यसक्तं सङ्कल्पेनैव तद्-धारणात् तत्-स्पर्श-रहितं निर्गुणं साक्षी चेताः केवलो निर्गुणश्च इति श्रुतेर् माया-गुण-स्पृष्टम् एव सद्-गुण-भोक्तृ-नियम्यतया गुणनुभवि-विकार-जननीम् अज्ञाम् इत्यारभ्य

एकस्तु पिबते देवः
स्वच्छन्दोऽत्र वशानुगाम् ।
ध्यान-क्रियाभ्यां भगवान्
भुङ्क्तेऽसौ प्रसभं विभुः ॥

इति श्रवणात् ॥१४ ॥

**बहिरन्तश्च भूतानाम् अचरं चरम् एव च ।**
**सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१५ ॥**

**श्रीधर**: किं च बहिर् इति । भूतानां चराचराणां स्वकार्याणां बहिश्चान्तश्च तदेव सुवर्णम् इव कटक-कुन्तलादीनाम् । जल-तरङ्गाणाम् अन्तर्-बहिश्च जलम् इव । अचरं स्थावरं चरं जङ्गमं च भूत-जातं तदेव । कारणात्मत्वात् कार्यस्य । एवम् अपि सूक्ष्मत्वाद् रूपादि-हीनत्वादतदविज्ञेयम् इदं तदिति स्पष्टं ज्ञानार्हं न भवति । अतएवाविदुषां योजन-लक्षान्तरितम् इव दूरस्थं च । सविकारायाः प्रकृतेः परत्वात् । विदुषां पुनः प्रत्यग्-आत्मत्वादन्तिके च तन् नित्यं सन्निहितम् । तथा च मन्त्रः —

तदेजति तन् नैजति
तद्-दूरे तद्वान्तिके ।
तद्-अन्तरस्य सर्वस्य
तदु सर्वस्यास्य बाह्यतः ॥ इति ।

एजति चलति नैजति न चलति ।तद्धु अन्तिके इति च्छेदः ॥१५ ॥

**विश्वनाथ**: भूतानां स्वकार्याणां बहिश् चान्तश्च यथा देहानाम् आकाशादिकम् ।अचरं स्थावरं चरं जङ्गमं च भूत-जातं तदेव ।कार्यस्य कारणात्मकत्वात् ।एवम् अपि रूपादिभिन्नत्वात् तद्-अविज्ञेयम् इदं तदिति स्पष्टं ज्ञानार्हं न भवतीत्यतएवा-विदुषां योजन-कोट्य्-अन्तरम् इव दूरस्थं विदुषां पुनः स्व-गृह-स्थितम् एवान्तिके च तत् स्वदेह एवान्तर्यामित्वात् दूरात् सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् इत्यादि श्रुतिभ्यः ॥१५ ॥

**बलदेव**: बहिर् इति ।भूतानां चिज्-जडात्मकानां तत्त्वानां बहिर् अन्तश्च स्थितम् । अन्तर् बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः । इति श्रवणात् । अचरम् अचलं चरं चलं च आसीनो दूरं व्रजति शयानो याति सर्वतः इति श्रुतेः । सूक्ष्मत्वात् प्रत्यत्क्काच् चित्-सुख-मूर्तित्वादविज्ञेयं देवतान्तरवज् ज्ञातुइम् अश-क्यमतो दूरस्थं चेति यन् मनसा न मनुते न चक्षुषा पश्यति कश्चनैनम् इत् श्रुतेः । गान्धर्व-वासितेन श्रोत्रेण षड्-जादिवद्भक्ति-भावितेन करणेन तु शक्यं तज् ज्ञातुम् इत्याह अन्तिके च तदिति । मनसिवानुदृष्टव्य्म्, कश्चिद्धीरः प्रत्यग्-आत्मानम् ऐक्षत ।भक्ति-योगे हि तिष्ठति इत्यादि श्रवणात् ।भक्त्या त्वनन्यया शक्यः इत्यादि स्मृतेश्च ॥१५ ॥

अविभक्तं च भूतेषु विभक्तम् इव च स्थितम् ।
भूतभर्तृच तज् ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६ ॥

**श्रीधर**: किं चाविभक्तम् इति ।भूतेषु स्थावरजङ्गमात्मकेष्वविभक्तं कारणात्म-नाभिन्नं कार्यात्मना विभक्तं भिन्नमिवावस्थितं च समुद्राज्जातं फेनादि समुद्रादन्यन् न भवति ।तत्स्वरूपमेवोक्तं ज्ञेयं भूतानां भर्तृ च पोषकं स्थितिकाले ।प्रलयकाले च ग्रसिष्णु ग्रसनशीलं सृष्टिकाले च प्रभविष्णु नानाकार्यात्मना प्रभवनशीलम् ॥१६ ॥

**विश्वनाआथ**: भूतेषु स्थावर-जङ्गमात्मकेषु अविभक्तं कारणात्मना अभिन्नं का-र्यात्मना विभक्तं भिन्नम् इवा स्थितं । तदेव श्री-नारायण-स्वरूपं सत् । भूतानां भर्तृ स्थिति-काले पालकं ।प्रलय-काले ग्रसिष्णु संहारकम् । सृष्टिकाले प्रभविष्णु च नाना-कार्यात्मना प्रभवन-शीलम् ॥१६ ॥

**बलदेव**: अविभक्तम् इति ।विभक्तेषु मिथो भिन्नेषु जीवेष्वविभक्तम् एकं तद्ब्रह्म विभक्तम् इव प्रति-जीवं भिन्नम् इव स्थितम् ।एकं सन्तं बहुधा दृश्यमानम् इति श्रुतेः ।

एक एव परो विष्णुः
सर्वत्रापि न संशयः ।
ऐश्वर्याद्रूपम् एकं च
सूर्यवद्बहुधेयते ॥ इति स्मृतेश्च ।

तच् च भूत-भर्तृ-स्थितौ भूतानां पालकं प्रलये तेषां ग्रसिष्णु काल-शक्त्या संहारकं, सर्गे प्रभविष्णु प्रधान-जीव-शक्तिभ्यां नाना-कार्यात्मना प्रभवन-शीलं । श्रुतिश्च यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्ब्रह्म तद्विजिज्ञासस्व । इति ॥ १६ ॥

**ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।**
**ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥**

**श्रीधरः** किं च ज्योतिषाम् अपीति । ज्योतिषां सूर्यादीनाम् अपि ज्योतिः प्रकाशकं तत् । येन सूर्यस्तपति तेजसेन्धः । न तत्र सूर्यो भाति न चन्द्र-तारकं नेमा विद्युतो भान्ति कुतोऽयम् अग्निः । तदेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति ॥ इत्यादि-श्रुतेः । अतएव तमसोऽज्ञानात् परं तेनासंसृष्टम् उच्यते । आदित्य-वर्णं तम्ससः परस्तात् इत्यादि-श्रुतेः । ज्ञानं च तदेव बुद्धि-वृत्तौ अभिव्यक्तम् । तदेव रूपाद्य्-आकारेण ज्ञेयं च ज्ञान-गम्यं च । अमानित्वादि-लक्षणेन पूर्वोक्त-ज्ञान-साधनेन प्राप्यम् इत्यर्थः । ज्ञान-गम्यं विशिनष्टि सर्वस्य प्राणिमात्रस्य हृदि विष्ठितं विशेषेणाप्रच्युत-स्वरूपेण नियन्तृतया स्थितम् । धिष्ठितम् इति पाठे अधिष्टाय स्थितिम् इत्यर्थः ॥ १७ ॥

**विश्वनाथः** ज्योतिषां चन्द्रादित्यानाम् अपि तज् ज्योतिः प्रकाशकं । येन सूर्यस्तपति तेजसेन्धः । न तत्र सूर्यो भाति न चन्द्र-तारकं नेमा विद्युतो भान्ति कुतोऽयम् अग्निः । तदेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति ॥ इत्यादि-श्रुतेः । अतएव तमसोऽज्ञानात् परं तेनासंसृष्टम् उच्यते । आदित्य-वर्णं तम्ससः परस्तात् इत्य् आदि-श्रुतेः । ज्ञानं तदेव बुद्धि-वृत्तौ अभिव्यक्तं सत् ज्ञानम् उच्यते । तदेव रूपाद्य्-आकारेण परिणतं ज्ञेयं च । तदेव ज्ञान-गम्यं पूर्वोक्तेनामानित्वादि-ज्ञान-साधनेन प्राप्यम् इत्यर्थः । तदेव परमात्म-स्वरूपं सत् सर्वस्य प्राणिमात्रस्य हृदि धिष्ठितं नियन्तृतयाध्बिष्ठाय स्थितम् इत्यर्थः ॥ १७ ॥

**बलदेवः** ज्योतिषां सूर्य्दीनाम् अपि तद्ब्रह्म ज्योतिः प्रकाशकं ।

न तत्र सूर्यो भाति न चन्द्र-तारकं

नेमा विद्युतो भान्ति कुतोऽयम् अग्निः ।
तदेव भान्तम् अनुभाति सर्वं
तस्य भासा सर्वम् इदं विभाति ॥

इत्यादिश्रुतेस्तद्ब्रह्म तद्ब्रह्म तमसः प्रकृतेः परं तेनास्पृष्टाम् उच्यते आदित्य-वर्णं तम्ससः परस्तात् इत्य् श्रुत्या ।ज्ञानं चिद्-एक-रसम् उच्यते विज्ञानम् आनन्द-घनं ब्रह्म इति श्रुत्या ।ज्ञानं मुमुक्षोः शरणत्वेन ज्ञातुम् अर्हम् उच्यते तं ह देवम् आत्म-बुद्धि-प्रकाशं मुमुक्षुर् वै शरणम् अहं प्रपद्ये इति श्रुत्या ।ज्ञान-गम्यम् उच्यते तम् एव विदित्वातिमृत्युम् एति इति श्रुत्या ।सर्वस्य प्राणिमात्रस्य हृदि धिष्ठितं नियन्तृतयाध्बिष्ठाय स्थितम् इत्युच्यते अन्तःप्रविष्टः शास्ता जनानाम् इति श्रुत्या । न च सर्वतः पाणीत्यादि पञ्चकं जीव-परतयैव नेयं तत्-प्रकरणत्वादि-वाच्यं जीव-वदीश्वरस्यापि क्षेत्रज्ञत्वेन प्रकृतत्वात् ।सर्वतः पाणीत्यादि-सार्धकस्य ब्रह्मैवोपक्रम्य श्वेताश्वतरैः पठित्वात् प्रकरण-शावल्यस्योपनिषत्सु वीक्षणाच् च ॥१७ ॥

**इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।**
**मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८ ॥**

**श्रीधरः** उक्तं क्षेत्रादिकम् अधिकारिफल-सहितम् उपसंहरति इतीति ।इत्येनं क्षेत्रं महाभूतादि-धृत्य्-अन्तम् ।तथा ज्ञानं चामानित्वादि-तत्त्व-ज्ञानार्थ-दर्शनान्तम् ।ज्ञेयं चानादिमत् परं ब्रह्मेत्यादिविष्ठितम् इत्यन्तम् ।वशिष्ठादिभिर् विस्तरेणोक्तं सर्वम् अपि मया सङ्क्षेपेणोक्तम् ।एतच् च कथम् ।पूर्वाध्यायोक्त-लक्षणो मद्-भक्तो विज्ञाय मद्-भावाय ब्रह्मत्वायोपपद्यते योग्यो भवति ॥१८ ॥

**विश्वनाथः** उक्तं क्षेत्रादिकम् अधिकारिफल-सहितम् उपसंहरति इतीति ।क्षेत्रं महाभूतादि धृत्य्-अन्तम् ।ज्ञानम् अमानित्वादि-तत्त्व-ज्ञानार्थ-दर्शनान्तम् ।ज्ञेयं ज्ञान-गम्यं च अनादीत्यादिधिष्ठितम् इत्यन्तम् ।एकम् एव तत्त्वं ब्रह्म भगवत्-परमात्म-शब्द-वाच्यं च सङ्क्षेपेणोक्तम् ।मद्-भक्तो भक्तिमज् ज्ञानी मद्-भावाय मत्-सायुज्याय ।यद्वा मद्-भक्तो ममैकान्तिको दास एतद् विज्ञाय मत्-प्रभोर् एतावदैश्वर्यम् इति ज्ञात्वा मयि भावाय प्रेम्ण उपपद्यत उपपन्नो भवति ॥१८ ॥

**बलदेवः** उक्तं क्षेत्रादिकं तज्-ज्ञान-फल-सहितम् उपसंहरति इति क्षेत्रम् इति ।महाभूतानि इत्यादिना चेतना धृतिः इत्यन्तेन क्षेत्र-स्वरूपम् उक्तम् ।अमानित्वम् इत्यादिना तत्त्व-ज्ञानार्थ-दर्शनम् इत्यन्तेन ज्ञेयस्य क्षेत्र-द्वयस्य ज्ञानं तत्-साधनम् उक्तम् ।अनादि मत्-परम् इत्यादिना हृदि सर्वस्य विष्ठितम् इत्यन्तेन ज्ञेयं क्षेत्रज्ञ-द्वयं चोक्तं मया ।एतत् त्रयं विज्ञाय मिथो विवेकेनावगत्य मद्-भावाय मत्-प्रेम्णे मत्-स्वभावाय वासंसारित्वाय कल्पते योग्ये भवति मद्-भक्तः ॥१८ ॥

**प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।**
**विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥१९ ॥**

**श्रीधरः** तदेवं तत् क्षेत्रं यच् च यादृक् चेत्य् एतावत् प्रपञ्चितम् । इदानीं तु यद्विकारि यतश्च यत् स च यो यत्-प्रभावश्चेत्येतत् पूर्वं प्रतिज्ञातम् एव प्रकृति-पुरुषयोः संसार-हेतुकत्व-कथनेन प्रपञ्चयति प्रकृतिम् इति पञ्चभिः । तत्र प्रकृति-पुरुषयोर् आदिमत्वे तयोर् अपि प्रकृत्य्-अन्तरेण भाव्यम् इत्यनवस्थापत्तिः स्यात् । अतस् तावुभावनादी विद्धि । अनादेर् ईश्वरस्य शक्तित्वात् प्रकृतेर् अनादित्वम् । पुरुषेऽपि तद्-अंशत्वादनादिर् एव । अत्र च परमेश्वरस्य तच्-छक्तीनाम् अनादित्वं नित्यत्वं च श्रीमच्-छङ्कर-भगवद्-भाष्य-कृद्भिर् अतिप्रबन्धेनोपपादितम् इति ग्रन्थ-बाहुल्यान् नास्माभिः प्रतन्यते । विकारांश्च देहेन्द्रियादीन् गुणांश्च गुण-परिणामान् सुख-दुःख-मोहादीन् प्रकृतेः सम्भूतान् विद्धि ॥१९ ॥

**विश्वनाथः** परमात्मानमुक्त्वा क्षेत्र-ज्ञ-शब्द-वाच्यं जीवात्मानं वक्तुं कुतस्तस्य माया-संस्लेषः, कदा तद्-आरम्भोऽभूदित्यपेक्षायामाह प्रकृतिं मायां पुरुषं जीवं चोभावप्यनादी न विद्यते आदि कारणं ययोस्तथाभूतौ विद्धि अनादेर् ईश्वरस्य मम शक्तित्वात् ।

भूमिर् आपोऽनलो वायुः खं मनो बुद्धिर् एव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिर् अष्टधा ॥
अपरेयम् इतस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीव-भूतां महाबाहो ययेदं धार्यते जगत् ॥

इति मद्-उक्तेर् माया-जीवयोर् अपि मच्-छक्तित्वेन अनादित्वात् तयोः संश्लेषोऽपि अनादिर् इति भावः । तत्र मिथः संश्लिष्टयोर् अपि तयोर् वस्तुतः पार्थक्यम् अस्ति एव इत्याह विकारांश्च देहेन्द्रियादीन् गुणांश्च गुण-परिणामान् सुख-दुःख-शोक-मोहादीन् प्रकृति-सम्भूतान् प्रकृत्य्-उद्भूतान् विद्धीति क्षेत्राकार-परिणतायाः प्रकृतेः सकाशाद्भिन्नम् एव जीवं विद्धीति भावः ॥१९ ॥

**बलदेवः** एवं मिथो विविक्त-स्वभावयोर् अनाद्योः प्रकृति-जीवयोः संसर्गस्यानादि-कालिकत्वं संसृष्टयोस्तयोः कार्य-भेदस्तत्-संसर्गस्यानादि-कालिकस्य हेतुश्च निरूप्यते प्रकृतिम् इत्यादिभिः । अपिर् अवधृतौ । मिथः सम्पृक्तौ प्रकृति-पुरुषावुभावनाद्येव विद्धि मदीय-शक्तित्वान् नित्यावेव जानीहि । तयोर् मच्-छक्तित्वं तु पुरैवोक्तं भूमिर् आपः इत्यादिना । अनादि-संसृष्टयोर् अपि तयोः स्वरूप-भेदोऽस्तीत्याशयेनाह विकारान् देहेन्द्रियादीन् । गुणांश्सुख-दुःखानि प्रकृति-सम्भवान्

प्राकृतान् न तु जैवान् विद्धीति क्षेत्रात्मना पारिणतायाः प्रकृतेर् अन्यो जीव इति दर्शितम् ॥१९ ॥

> कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
> पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥२० ॥

**श्रीधर**: विकाराणां प्रकृति-सम्भवत्वं दर्शयन् पुरुषस्य संसार-हेतुत्वं दर्शयति कार्येति ।कार्यं शरीरम् ।कारणानि सुख-दुःख-साधनानीन्द्रियाणि ।तेषां कर्तृत्वे तद्-आकार-परिणामे प्रकृतिर् हेतुर् उच्यते कपिलादिभिः ।पुरुषो जीवस्तु तत्-कृत-सुख-दुःखानां भोक्तृत्वे हेतुर् उच्यते ।अयं भावः यद्यपि अचेतनायाः प्रकृतेः स्वतः-कर्तृत्वं न सम्भवति तथा पुरुषस्याप्य् अविकारिणो भोक्तृत्वं न सम्भवति ।तथापि कर्तृत्वं नाम क्रिया-निर्वर्तकत्वम् ।तच् चाचेतनस्यापि चेतनादृष्ट-वशात् चैतन्याधिष्ठितत्वात् सम्भवति यथा वह्नेर् ऊर्ध्व-ज्वलनं वयोस्तिर्यग् गमनं वत्सादृष्ट-वशात् गोस्तन्य-पयसः क्षरणम् इत्यादि ।अतः पुरुष-सन्निधानात् प्रकृतेः कर्तृत्वम् उच्यते भोक्तृत्वं च सुख-दुःख-संवेदनं, तच् च चेतन-धर्म एवेति प्रकृति-सन्निधानात् पुरुषस्य भोक्तृत्वम् उच्यते इति ॥२० ॥

**विश्वनाथ**: तस्य माया-संश्लेषं दर्शयति ।कार्यं शरीरम् ।कारणानि सुख-दुःख-साधनानीन्द्रियाणि ।कर्तार इन्द्रियाधिष्ठातारो देवास्तत्र तथाध्यासेन पुरुष-संसर्गात् कार्यादि-रूपेण परिणता स्यादविद्याख्यया स्व-वृत्त्या तद्-अध्यास-प्रदा च स्यादित्यर्थः ।तत्-कृत-सुख-दुःखानां भोक्तृत्वे पुरुषो जीव एव हेतुः ।अयं भावः यद्यपि कार्यत्व-कारणत्व-कर्तृत्व-भोक्तृत्वानि प्रकृति-धर्मा एव स्युस्तदपि कार्यत्वादिषु जडांश-प्राधान्यात्, सुख-दुःख-संवेदन-रूपे भोगे तु चैतन्यांश-प्राधान्यात् ।प्राधान्येन व्यपदेशा भवन्तीति न्यायात् कार्यत्वादिषु प्रकृतिर् हेतुः ।भोक्तृत्वे पुरुषो हेतुर् इत्युच्यते इति ॥२० ॥

**बलदेव**: अथ संसृष्टयोस्तयोः कार्य-भेदम् आह कार्येति शरीरं कार्यं ज्ञान-कर्म-साधकत्वाद् इन्द्रियाणि कारणानि तेषां कर्तृत्वे तत्-तद्-आकार-स्व-परिणामे प्रकृतिर् हेतुः ।पुरुषः प्रकृतिस्थो हि इत्यग्रिमात् स्व-संसर्गेण सचेतनां प्रकृतिं पुरुषोऽधितिष्ठति ।तद्-अधिष्ठिता तु सा तत्-कर्माणु-गुण्येन परिणममाना तत्-तद्-देहादीनां स्रष्ट्रीति प्रकृत्यार्पितानां सुखादीनां भोक्तृत्वे पुरुषो हेतुस्तेषां भोगे स एव कर्तेयर्थः ।प्रकृत्य्-अधिष्ठातृत्वं सुखादि-भोक्तृत्वं च पुरुषस्य कार्यम् ।तच् च शरीरादि-कर्तृत्वं तु तद्-अधिष्ठातायाः प्रकृतेर् इति पुरुषस्यैव कर्तृत्वं मुख्यम् ।एवम् आह सूत्रकारः कर्ता शास्त्रार्थवत्त्वात् इत्यादिभिः ।परेशस्य हरेर् अधिष्ठातृत्वं तु सर्वत्रावर्जनीयम् इत्युक्तं वक्ष्यते च ॥२० ॥

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ २१ ॥

**श्रीधर**ः तथाप्यविकारिणो जन्म-रहितस्य च भोक्तृत्वं कथम् इति । अत आह पुरुष इति । हि यस्मात् प्रकृतिस्थस्तत्-कार्ये देहे तादात्म्येन स्थितः पुरुषः । अतस् तज्-जनितान् सुख-दुःखादीन् भुङ्क्ते । अस्य च पुरुषस्य सतीषु देवादि-योनिषु असतीषु तिर्यग्-आदि-योनिषु यानि जन्मानि तेषु गुण-सङ्गो गुणैः शुभाशुभ-कर्म-कारिभिर् इन्द्रियैः सङ्गः कारणम् इत्यर्थः ॥ २१ ॥

**विश्वनाथ**ः किन्तु तत्र अनाद्य्-अविद्या-कृतेनाध्यासेन एव कर्तृत्व-भोक्तृत्वादिकं तदीयम् अपि धर्मं स्वीयं मन्यते । तत एवास्य संसार इत्य् आह पुरुष इति । प्रकृतिस्थः प्रकृति-कार्य-देहे तादात्म्येन हि स्थितः । प्रकृतिजान् अन्तःकरण-धर्मान् शोक-मोह-सुख-दुःखादीन् गुणान् स्वीयान् एव अभिमन्यमानो भुङ्क्ते । तत्र कारणं गुण-सङ्गः । गुणमय-देहेषु अस्यासङ्गस्याप्यात्मनः सङ्गोऽविद्या-कल्पितः । क्व भुङ्क्ते इत्यपेक्षायाम् आह सतीषु देवादि-योनिषु असतीषु तिर्यग्-आदि-योनिषु शुभाशुभ-कर्म-कृतासु यानि जन्मानि तेषु ॥ २१ ॥

**बलदेव**ः प्रकृत्य्-अधिष्ठाने सिखादिभोगे च पुरुषस्यैव कर्तृत्वम् इत्येतत् स्फुटयति तस्य प्रकृति-संसर्गे हेतुं च दर्शयति पुरुष इति । चित्-सुखैक-रसोऽपि पुरुषोऽनादिकर्म-वासनया प्रकृतिस्थस्ताम् अधिष्ठित-तत्-कृत-देहेन्द्रियः प्रान-विशिष्टः सन्न् एव तत्-कृतान् गुणान् सुखादीन् भुङ्क्तेऽनुभवति क्वेत्याह सदिति । सतीषु देव-मानवादिष्वसतीषु पशु-पक्ष्य्-आदिषु च साध्व्-असाधु-रचितासु योनिषु यानि जन्मादीनि तेष्विति तत्र तत्र पुरुषस्यैव कर्तृत्वम् ।

तत्संसर्गे हेतुमाह कारणम् इति । गुणोऽसङ्गोऽनादि-गुण-मय-विसय-स्पृहा । अयम् अर्थः अनादिर् जीवः कर्म-रूपाणाआदिवासनारक्तः । स च भोक्तृत्वाद् भोग्यान् विषयान् स्पृहयंस्तद्-अर्पित-कामनादि-सन्निहितां प्रकृतिम् आश्रयिष्यति यावत् सत्-प्रसङ्गात् तत्-तद्-वासना क्षीयते । तत्-क्षये तु परात्म-धाम-सुखानि भुङ्क्ते सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता इत्यादि श्रुतिभ्य इति । यत् तु प्रकृतेर् इत्यादेः कार्य-कारणेत्यादेः प्रकृत्यैव चेत्य् आदेर् नान्यं गुणेभ्यः इत्यादेश्चापाततार्थ-ग्राहिभिः साङ्ख्यैः प्रकृतेर् एव कर्तृत्वम् उक्तं, तत् किल रभसाभिधानम् एव लोष्ट्र-काष्ठवदचेतनायास्तस्यास् तत्त्व-सम्भावात् । उपादानापरोक्ष-चिकीर्षा-कृतिमत्त्वं खलु कर्तृत्वं, तच् च चेतनस्यैवेति श्रुतिर् आह - विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च । एष हि द्रष्टा स्प्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता निज्ञानात्मा पुरुषः इत्य् आदिकम् ।

यच्च पुरुष-सन्निधानाच् चैतन्याध्यासात् तस्यास्तत्त्वम् इत्य् आहुस्तन् न । यत् सन्निध्यधस्त-चैतन्यात् तस्याः कर्तृत्वं तत् तस्यैव सन्निहितस्येति सुवचत्वात् । न खलु तपायसो दग्धृत्वम् अयो-हेतुकम् अपि तु वह्नि-हेतुकम् एव दृष्टम् । न च चलति जलं फलति तरुर् इतिवज् जडायास्तस्यास्तत्त्व-सिद्धिर् जलादिष्व् अन्त-र्याम्य्-अधिष्ठितत्वेनेष्टासिद्धेर् विधायक-श्रुति-व्याकोपाच् चैतेदेवम् । न हि ज-ड-प्रकृतिम् उद्दिश्य स्वर्गादि-फलकं ज्योतिष्टोमादि-मोक्ष-फलकं ध्यानं च स्मृतिर् विधत्तेऽपि तु चेतनम् एव भोक्तारम् उद्दिश्येति पुरुषस्यैव कर्तृत्वम् । तच् च प्रकृतेर् इति यदुक्तं तत् तु तद्-वृत्ति-प्राचुर्यादेव यथा करेण बिभ्रति पुरुषे करो बिभर्तीति व्यपदेशस्तथा प्रकृत्या कुर्वति पुरुषे प्रकृतिः करोतीति स भवेदित्येके, प्राकृतैर् देहा-दिभिर् युक्तस्यैव पुरुषस्य यज्ञ-युद्धादि-कर्म-कर्तृत्वं, न तु तैर् वियुक्तस्य शुद्धस्येत्य् अतः प्रकृतेस्तदित्यपरे ॥ २१ ॥

**उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।**
**परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२ ॥**

**श्रीधर**: तदनेन प्रकारेण प्रकृत्य्-अविवेकादेव पुरुषस्य संसारः । न तु स्व-रूपतः । इत्याशयेन तस्य स्वरूपम् आह उपद्रष्टेति । अस्मिन् प्रकृति-कार्ये देहे वर्तमानोऽपि पुरुषः परो भिन्न एव । न तद्-गुणैर् युज्यत इत्य् अर्थः । तत्र हेतवः यस्मादुपद्रष्टा पृथग्-भूत एव समीपे स्थित्वा द्रष्टा साक्षीत्यर्थः । तथा अनुमन्ता अनुमोदितैव सन्निधि-मात्रेणानुग्राहकः । साक्षी चेताः केवलो निर्गुणश्च इत्यादि श्रुतेः । तथा ऐश्वर्येण रूपेण भर्ता विधायक इति चोक्तः । भोक्ता पालक इति च । महांश्चासौ ईश्वरश्च स ब्रह्मादीनाम् अपि पतिर् इति च परमात्मा वान्तर्यामीति चोक्तः श्रुत्या । तथा च श्रुतिः एष सर्वेश्वर एव्स भूताधिपतिर् लोक-पालः इत्यादि ॥ २२ ॥

**विश्वनाथ**: जीवात्मानम् उक्त्वा परमात्मानम् आह उपद्रष्टेति । यद्यपि अनादि मत्-परं ब्रह्म इत्यादिना हृदि सर्वस्य विष्ठितम् इत्यनेन च सामान्यतः पशेषतश्च परमात्मा प्रोक्त एव, तदपि तस्य जीवात्म-साहित्येनापि पृथग् एव स्पष्टतया देह-स्थत्व-ज्ञापनार्थम् इयम् उक्तिर् ज्ञेया । अस्मिन् देहे परोऽन्यः पुरुषो यो महेश्वर् स परमात्मेति चाप्य् उक्तः । परमात्मेति च नाम्नाप्युक्तो भवतीत्यर्थः । तत्र परम-शब्द एकात्मवाद-पक्षे स्वांश इति द्योतनार्थो जीवस्य उप समीपे पृथक्-स्थित एव द्रष्टा साक्षी । अनुमन्तानुमोदन-कर्ता सन्निधि-मात्रेणानुग्राहकः । साक्षी चेताः केवलो निर्गुणश्च इति श्रुतेः । तथा भर्ता धारको भोक्ता पालकः ॥ २२ ॥

**बलदेव**: देहे सुखादिभोक्त्र्यावस्थितं जीवम् उक्त्वा नियन्तृतया तत्रावस्थितम् ईश्वरम् आह उपद्रष्टेति । अस्मिन् देहे परो जीवादन्यः पुरुषोऽस्ति यो महेश्वरः

परमात्मेति प्रोक्तः । उपद्रष्टा सन्निधौ पृथक्-स्थित एव साक्षी । अनुमन्तानुमति-दाता तद्-अनुमतिं विना जीवः किञ्चिद् अपि कर्तुं न क्षम इत्यर्थः । भर्ता धारकः । भोक्ता पालकः । सर्वतः पाणि इत्यादिभिर् उक्तस्यापीशस्य जीवेन सह स्थितिं वक्तुं पुनर् उक्तिः ॥ २२ ॥

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २३ ॥

**श्रीधर**: एवं प्रकृति-पुरुष-विवेक-ज्ञानिनं स्तौति य एवम् इति । एवम् उपद्र-ष्टृत्वादि-रूपेण पुरुषं यो वेत्ति प्रकृतिं च गुणैः सह सुख-ऽदुःखादि-परिणामैः सहितां यो वेत्ति स पुरुषः सर्वथा विधिम् अतिलङ्घ्येह वर्तमानोऽपि पुनर् नाभिजायते । मुच्यते एवेत्यर्थः ॥ २३ ॥

**विश्वनाथ**: एतज्-ज्ञान-फलम् आह य इति । पुरुषं परमात्मानं प्रकृतिं माया-शक्तिं । च-काराअज् जीव-शक्तिं च । सर्वथा वर्तमानोऽपि लय-विक्षेपा-दि-पराभूतोऽपि ॥ २३ ॥

**बलदेव**: एतज्-ज्ञान-फलम् आह य इति । एवं मद्-उक्त-विधया मिथो विविक्ततया यः पुरुषं महेश्वर-प्रकृतिं च जीवं च वेत्ति ! सर्वथा व्यवहार-सम्पर्केण वर्तमानोऽपि भूयो नाभिजायते देहान्ते विमुच्यत इत्यर्थः ॥ २३ ॥

ध्यानेनात्मनि पश्यन्ति के चिदात्मानमात्मना ।
अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥ २४ ॥

**श्रीधर**: एवम्भूत-विविक्तात्म-ज्ञान-साधन-विकल्पान् आह ध्यानेनेति द्वा-भ्याम् । ध्यानेनात्माकारप्रत्यययावृत्त्या । आत्मनि देह एव आत्मना मनसा एवम् आत्मानं केचित् पश्यन्ति । अन्ये तु साङ्ख्येन प्रकृति-पुरुष-वैलक्षण्यालोचनेन योगे-नाष्टाङ्गेन । अपरे च कर्म-योगेन । पश्यन्तीति सर्वत्रानुषङ्गः । एतेषां च ध्यानादीनां यथा-योग्यं क्रम-समुच्चये सत्यपि तत्-तन्-निष्ठा-भेदाभिप्रायेण विकल्पोक्तिः ॥ २४ ॥

**विश्वनाथ**: अत्र साधन-विकल्पम् आह ध्यानेति द्वाभ्याम् । केचिद्भक्ता ध्यानेन भगवच्-चिन्तनेनैव । भक्त्या माम् अभिजानाति इत्यग्रिमोक्तेर् आत्मनि मन्स्यात्मना स्वयम् एव न त्वन्येन केनाप्युपकारेकेणेत्यर्थः । अन्ये ज्ञानिनः साख्यम् आत्म-नात्म-विवेकस्तेन। अपरे योगिनो योगेनाष्टाङ्गेन कर्मयोगेन निष्काम-कर्मणा च ।

अत्र साङ्ख्याष्टाङ्ग-योग-निष्काम-कर्म-योगाः परमात्म-दर्शने परस्परसैव हेतवो न तु साक्षाद्धेतवस्तेषां सात्त्विकत्वात् परमात्मनस्तु गुणातीतत्वात् । किं च ज्ञानं च मयि सन्न्यसेत् इति भगवद्-उक्तेर् ज्ञानादि-सन्न्यासानन्तरम् एव भक्त्याहम् एकया ग्राह्यः इत्युक्तेर् ज्ञानं विमुच्य तया भक्त्यैव पश्यन्ति ॥ २४ ॥

**बलदेव**: महेश्वरस्य प्राप्तौ साधन-विकल्पान् आह ध्यानेनेति द्वाभ्याम् । केचिद्विशुद्ध-चित्ता आत्मनि मनसि स्थितम् आत्मानं महेश्वरं मां ध्यानेनोपसर्जनी-भूत-ज्ञानेन पश्यन्ति साक्षात् कुर्वन्त्य् आट्मना स्वयम् एव, न त्वन्येनोपकारकेण । अन्ये साङ्ख्येनोपसर्जनी-भूत-ध्यानेन ज्ञानेन पश्यन्ति । अन्य-योगेनोपसर्जनीभू-त-ज्ञानेनाष्टाङ्गेन पश्यन्ति । अपरे तु कर्म-योगेनान्तर्गत-ध्यान-ज्ञानेन निष्कामेण कर्मणा ॥ २४ ॥

**अन्ये त्वेवम् अजानन्तः श्रुत्वान्येभ्य उपासते ।**
**तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥**

**श्रीधर**: अति-मन्दाधिकारिणां निस्तारोपायम् आह अन्य इति । अन्ये तु साङ्ख्य-योगादि-मार्गेण एवम्भूतम् उपद्रष्टृत्वादि-लक्षणम् आत्मानम् साक्षात्कर्तुम् अजानन्तोऽन्येभ्य आचार्येभ्य उपदेशतः श्रुत्वा उपासन्ते ध्यायन्ति । तेऽपि च श्रद्धयोपदेश-श्रवण-परायणाः सन्तो मृत्युं संसारं शनैर् अतितरन्त्येव ॥ २५ ॥

**विश्वनाथ**: अन्ये इतस्ततः कथा-श्रोतारः ॥ २५ ॥

**बलदेव**: अन्ये त्वेवम् ईदृशानुपायान् अजानन्तः श्रुति-परायणास् तत्-तत्-कथा-श्रवणादि-निष्ठाः साम्प्रतिका अन्येभ्यस् तद्-वक्तृभ्यस्तान् उपायान् श्रुत्वा तं महेश्वरम् उपासते । तेऽपि चात् त-सङ्गिनश्च क्रमेण तान् उपलभ्यानुष्ठाय च मृत्यु-मतितरन्त्येवेति तत्कथाश्रुतिमहिमातिशयो दर्शितः ॥ २५ ॥

**यावत् संजायते किं चित् सत्त्वं स्थावरजङ्गमम् ।**
**क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ॥ २६ ॥**

**श्रीधर**: अथ कर्म-योगस्य तृतीय-चतुर्थ-पञ्चमेषु प्रपञ्चितत्वाद्ध्यान-योगस्य च षष्ठाष्टमयोः प्रपञ्चितत्वाद्ध्यानादेश्च साङ्ख्य-विविक्तात्म-विषयत्वात् साङ्ख्यम् एव प्र-पञ्चयन्न् आह यावदित्यादि यावदध्यायमान्ति (?) । यावत् किञ्चित् वस्तु-मात्रं सत्त्वम् उत्पद्यते तत् सर्वं क्षेत्र-क्षेत्रज्ञयोर् योगादविवेक-कृत-तादात्म्याध्यासाद्भव-तीति जानीहि ॥ २६ ॥

**विश्वनाथ**: उक्तम् एवार्थं प्रपञ्चयति यावद् अध्याय-समाप्ति ।यावदिति यत्-प्रमाणकं निकृष्टम् उत्कृष्टं वा ।सत्त्वं प्राणि-मात्रम् ॥२६ ॥

**बलदेव**: अथानादि-संयुक्तयोः प्रकृति-जीवयोर् योगानुसन्धानाय तयोः संयोगेन सृष्टिं तावदाह यावदिति । स्थावर-जङ्गमं किञ्चित् सत्त्वं प्राणि-जातं यावद्यत्-प्रमाणकम् उत्कृष्टम् अपकृष्टं च सञ्जायते तत् क्षेत्र-क्षेत्रज्ञ-संयोगाद्विद्धि । क्षेत्रेण प्रकृत्या सह क्षेत्रज्ञयोः सम्बन्धाज् जानीहीत्यर्थः । ईश्वरः प्रकृति-जीवौ नियमयन् प्रवर्तयति, तौ तु मिथः सम्बध्नीत ।ततो देहोत्पत्ति-द्वारा प्राणि-सृष्टिर् इत्यर्थः ॥२६ ॥

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥२७ ॥

**श्रीधर**: अविवेक-कृतं संसारोद्भवम् उक्त्वा तन्-निवृत्तये विक्तात्म-विषयं स-म्यग्-दर्शनम् आह समम् इति ।स्थावर-जङ्गमात्मकेषु भूतेषु निर्विशेषं सद्-रूपेण समं यथा भवत्येवं तिष्ठन्तं परमात्मानं यः पश्यति अतएव तेषु विनश्यत्स्वपि अविनश्यन्तं यः पश्यति स एव सम्यक् पश्यति ॥२७ ॥

**विश्वनाथ**: परमात्मानं त्वेवं जानीयाद् इत्याह समम् इति । विनश्यत्स्वपि देहेषु यः पश्यति, स एव ज्ञानीत्यर्थः ॥२७ ॥

**बलदेव**: अथ प्रकृतौ तत्-संयुक्तेषु च जीवेषु स्थितम् अपीश्वरं तेभ्यो विविक्तं पश्येदित्याह समम् इति । यस्त्वतत्त्ववित् प्रसङ्गी सर्वेषु स्थावर-जङ्गम-देहवत्सु भूतेषु जीवेषु समम् एकरसं यथा स्यात् तथा तिष्ठन्तं परमेश्वरं विनश्यत्सु तत्-तद्-देह-विमर्देन विनाशं गच्छत्सु तेष्वविनश्यन्तं तद्-विअक्षणं पश्यति स एव पश्यति तद्-याथात्म्य-दर्शी भवति ।तथा च वैविध्य-विनाश-धर्मिभ्यः प्रकृति-संयोगिभ्यो जीवेभ्य ऐकरस्याविनाश-धर्मा परेशो विविक्त इति ॥२७ ॥

समं पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥२८ ॥

**श्रीधर**: कुत इति । अत आह समम् इति । सर्वत्र भूतमात्रे समं सम्यग् अप्रच्युत-स्वरूपेणावस्थितं परमात्मानं पश्यन् ।हि यस्मादात्मना स्वेनैवात्मानं न हिनस्ति ।अविद्यया सच्-चिद्-आनन्द-रूपम् आत्मानं तिरस्कृत्य न विनाशयति ।ततश्च परां गतिं मोक्षं प्राप्नोति ।यत् त्व् एवं न पश्यति स हि देहात्म-दर्शी देहेन

सहात्मानं हिनस्ति । तथा च श्रुतिः असूर्या नाम ते लोका अन्धेन तमसावृताअ । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥ २८ ॥

**विश्वनाथ**: आत्मना मनसा कुपथ-गामिना आत्मानं जीवं न हिनस्ति नाधःपातयति ॥ २८ ॥

**बलदेव**: अथोक्त-विषया तेभ्यो विविक्तम् ईश्वरं पश्यन् तद्-दर्शन-महिम्ना च प्रकृति-विकारेभ्यः स्व-विवेकं च लभत इत्याशयेनाह समं पश्यन् हीति । सर्वत्र भूतेषु समं यथा भवत्येवं सम्यग्-अप्रच्युत-स्वरूप-गुणतयावस्थितम् ईश्वरं पश्यन्न् आत्मानं स्वम् आत्मना प्रकृति-विकार-विवेक-ग्राहिणा विषय-रस-गृध्नुना मनसा न हिनस्ति नाधःपातयति, स तद्-रस-विरक्तेन तेन पराम् उत्कृष्टां गतिं तद्-विकारेभ्यः स्वैवेक-ख्यातिं याति ॥ २८ ॥

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।**
**यः पश्यति तथात्मानम् अकर्तारं स पश्यति ॥ २९ ॥**

**श्रीधर**: ननु शुभाशुभ-कर्म-कर्तृत्वेन वैषम्ये दृश्यमाने कथम् आत्मनः समत्वम् इत्याशङ्क्याह प्रकृत्यैवेति । प्रकृत्यैव देहेन्द्रियाकारेण परिणतया । सर्वशः प्रकारैः । क्रियमाणानि कर्माणि यः पश्यति । तथात्मानं चाकर्तारं देहाभिमानेनैव आत्मनः कर्तृत्वं न स्वतः । इत्येवं यः पश्यति स एव सम्यक् पश्यति । नान्य इत्यर्थः ॥ २९ ॥

**विश्वनाथ**: प्रकृत्यैव देहेन्द्रियाद्याकारेण परिणतया सर्वशः सर्वाण्यात्मानं जीवं देहाभिमानेनैव आत्मनः कर्तृत्वम्, न तु स्वतः । इत्येवं यः पश्यतीत्यर्थः ॥ २९ ॥

**बलदेव**: प्रकृतेः स्व-विवेकं कथं यातीत्य् अपेक्षायां तत्र प्रकारम् आह - प्रकृत्यैवेति द्वाभ्याम् । यः सर्वाणि कर्माणि प्रकृत्यैव चान् मद्-अधिष्ठितयेश्वर-प्रेरितया क्रियमाणानि पश्यति, तथात्मानं तेषां कर्मणाम् अकर्तारं पश्यति, स एव पश्यति स्व-याथाट्म्य-दर्शी भवति । अयम् अर्थः न खलु विज्ञानानन्द-स्वभावोऽहं युद्ध-यज्ञादीनि दुःखमयानि कर्माणि करोमि, किन्त्वनादिभोगवासनेनाविवेकिना मयाधिष्ठिता मद्-भोग-सिद्धये मद्-देहादि-द्वारा तानि करोतीति तद्-धेतुकत्वात् सैव तत्-कर्तृईति करम्-कारिण्याः प्रकृतेस्तद्-अकर्ता शुद्धो जीवो विविक्तः । शुद्धस्यापि कर्तृत्वं तु पश्यतीत्यनेन व्यक्तम् इति ॥ २९ ॥

**यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ।**
**तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥**

**श्रीधर**: इदानीं तु भूतानाम् अपि प्रकृतिस् तावन्-मात्रत्वेनाभेदाद्भूत-भेद-कृतम् अप्यात्मनो भेदम् अपश्यन् ब्रह्मत्वम् उपैतीत्याह यदेति । यदा भूतानां स्थावर-जङ्गमानां पृथग्-भावं भेदं पृथक्त्कम् एकस्थम् एकस्याम् एवेश्र-शक्ति-रूपा-यां प्रकृतौ प्रलये स्थितम् अनुपश्यति आलोचयति । अतएव तस्या एव प्रकृतेः सकाशाद् भूतानां विस्तारं सृष्टि-समयेऽनुपश्यति । तदा प्रकृति-तावन्-मात्रत्वेन भूतानाम् अप्यभेदं पश्यन् परिपूर्णं ब्रह्म सम्पद्यते ।ब्रह्मैव भवतीत्यर्थः ॥ ३० ॥

**विश्वनाथ**: यदा भूतानां स्थावर-जङ्गमानां पृथग्-भावं तत्-तद्-आकार-गतं पार्थक्यम् एकस्थम् एकस्यां प्रकृतावेव स्थितं प्रलय-काले अनुपश्यत्यालोचयति । ततः प्रकृतेः सकाशादेव भूतानां विस्तारं सृष्टि-समयेऽनुपश्यति तदा ब्रह्म सम्पद्यते ब्रह्मैव भवतीत्यर्थः ॥ ३० ॥

**बलदेव**: यदेति । अयं जीवो यदा भूतानां देव-मानवादीनां पृथग्-भावं तत्-तद्-आकार-गतं देवत्व-मानवत्व-दीर्घत्व-ह्रस्वत्वादि-रूप-पार्थक्यम् एकस्थं प्रकृति-गतम् एव प्रलयेऽनुपश्यति ततः प्रकृतित एव सर्गे तेषां देवत्वादीनां विस्तारं च पश्यति, न त्वात्मस्थं तत् पृथग्-भावं न चाटमनस्तद्-विस्तारं च पश्यति । स्व-प्रकृति-विविक्तात्म-दर्शी ।तदा तद्ब्रह्म सम्पद्यते तद्-विविक्तम् अभिव्यक्तापह-त-पाप्मत्वादि-बृहद्-गुणाष्टकम् स्वम् अनुभवतीत्यर्थः ॥ ३० ॥

### अनादित्वान् निर्गुणत्वात् परमात्मायम् अव्ययः ।
### शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

**श्रीधर**: तथापि परमेश्वरस्य संसारावस्थायां देह-सम्बान्ध-निमित्तैः कर्मभिस् तत्-फलैश्च सुख-दुःखादिभिर् वैषम्यं दुष्परिहरम् इति कुतः सम-दर्शनं । तत्राह अनादित्वादिति । यदुत्पत्तिमत् तद् एव हि व्येति विनाशम् एति । यच् च गुण-वद्वस्तु तस्य हि गुण-नाशे व्ययो भवति । अयं तु परमात्मा अनादि निर्गुणश्च । अतोऽव्ययोऽविकारीत्यर्थः ।तस्मात् शरीरे स्थितोऽपि न किञ्चित् करोति ।न च कर्म-फलैर् लिप्यते ॥ ३१ ॥

**विश्वनाथ**: ननु कारणं गुण-सङ्गोऽस्य सद्-असद्-योनि-जन्मसु इत्युक्तम् । तत्र देह-गतत्वेन तुल्यत्वेऽपि जीवात्मैव गुण-लिप्तः संसरति न तु परमात्मेति । कुत इत्य् अत आह अनादित्वादिति ।न विद्यते आदिः कारणं यतः स अनादिः । यथा पञ्चम्य्-अन्त-पदार्थेनानुत्तम-शब्देन परमोत्तम उच्यते तथैव अनादि-शब्देन परम-कारणम् उच्यते । ततश्चानादित्वात् परम-कारणत्वात् निर्गुणत्वान् निर्गता गुणः सृष्ट्यादयो यतस्तस्य भावस्तत्त्वं तस्माच् च जीवात्मनो विलक्षणोऽयं परमा-त्मा ।अव्ययः सर्वदैव सर्वथैव स्वीय-ज्ञानानन्दादि-व्यय-रहितः ।शरीर-स्थोऽपि

तद्-धर्माग्रहणात् न करोति जीववत् न कर्ता, न भोक्ता भवति, न च लिप्यते शरीर-गुण-लिप्तश्च न भवति ॥ ३१ ॥

**बलदेव**: ननु परेशम् आत्मानं च विविक्तं पश्यति कृतार्थो भवतीत्युक्तिर् अयुक्ता एतेभ्य एव भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्यसंज्ञास्ति इति जीवस्य देहेन सहोत्पत्ति-विनाश-श्रवणादिति चेत् तत्राह अनादित्वादिति ।अयम् आत्मा जीवः शरीरस्थोऽप्यनादित्वात् परम्-अव्ययोऽव्ययत्व-प्रधान-धर्मत्वाद्वि-नाश-शून्यो निर्गुणत्वाद्विशुद्ध-ज्ञानानन्दत्वान् न युद्ध-यज्ञादि-कर्म करोति ।अतः शरीरेन्द्रिय-स्वभावेनोत्पत्ति-विनाश-लक्षणेन न लिप्यते ।श्रुत्य्-अर्थस्त्वौपचारि-कतया नेयः ॥ ३१ ॥

**यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।**
**सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥**

**श्रीधर**: तत्र हेतुं स-दृष्टान्तम् आह यथेति । यथा सर्व-गतं पङ्कादिष्वपि स्थितम् आकाशं सौक्ष्म्याद् असङ्गत्वात् पङ्कादिभिर् नोपलिप्यते तथा सर्वत्र उत्तमे मध्यमे अधमे वा देहेऽवस्थितोऽप्यात्मा नोपलिप्यते ॥ ३२ ॥

**विश्वनाथ**: अथ दृष्टान्तम् आह यथा सर्वत्र पङ्कादिष्वपि स्थितम् अप्याकाशं सौक्ष्म्याद् असङ्गत्वात् पङ्कादिभिर् न लिप्यते, तथैव परमात्मा दैहिकैर् गुणैर् दोषैश्च न युज्यत इत्यर्थः ॥ ३२ ॥

**बलदेव**: ननु शरीरे स्थितस्तद्-धर्मैः कुतो न लिप्यते इत्यत्राह यथेति । यथा सर्वत्र पङ्कादौ गतं प्रविष्टम् अप्याकाशं सौक्ष्म्यात् तत्-तद्-धर्मैर् न लिप्यते, तथात्मा जीवः सर्वत्र देव-मानवादावुच्चावचे देहे स्थितोऽपि तद्-धर्मैर् न लिप्यते सौक्ष्म्यादेव ॥ ३२ ॥

**यथा प्रकाशयत्येकः कृत्स्नं लोकम् इमं रविः ।**
**क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥**

**श्रीधर**: असङ्गत्वाल् लेपो नास्तीत्य् आकाश-दृष्टान्तेन दर्शितम् । प्रकाश-कत्वाच् च प्रकाश्य-धर्मैर् न युज्यत इति रवि-दृष्टान्तेनाह यथा प्रकाशयतीति । स्पष्टोऽर्थः ॥ ३३ ॥

**विश्वनाथ**: प्रकाशकत्वात् प्रकाआश्य-धर्मैर् न युज्यत इति स-दृष्टान्तम् आह यथेति । रविर् यथा प्रकाशकः प्रकाश्य-धर्मैर् न युज्यते, तथा क्षेत्री परमात्मा

—

सूर्यो यथा सर्व-लोकस्य चक्षुर्
न लिप्यते चाक्षुषैर् बाह्य-दोषैः ।
एकस्तथा सर्व-भूतान्तरात्मा
न लिप्यते शोक-दुःखेन बाह्यः ॥ [क. उप्. २.२.११]

इति श्रुतेः ॥ ३३ ॥

**बलदेव**: देह-धर्म्मालिप्त एवात्मा स्व-धर्मेण देहं पुष्णातीत्याह यथेति । यथैको रविर् इमं कृत्स्नं लोकं प्रकाशयति प्रभया तथैकः क्षेत्री जीवः कृत्स्नम् आपाद-मस्तकम् इदं क्षेत्रं देहं प्रकाशयति चेतयति चेतनयेत्येवम् आह सूत्रकारः गुणाद्वा लोकवदिति ॥ ३३ ॥

**क्षेत्रक्षेत्रज्ञयोरेवम् अन्तरं ज्ञानचक्षुषा ।**
**भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥ ३४ ॥**

इति भगवद्गीतायां त्रयोदशोऽध्यायः

**श्रीधर**: अध्यायार्थम् उपसंहरति क्षेत्र-क्षेत्रज्ञयोर् इति । एवमुक्त-प्रकारेण क्षेत्र-क्सेत्रज्ञयोर् अन्तरं भेदं विवेक-ज्ञान-लक्षणेन चक्षुषा ये विदुः तथा चेयमुक्ता भूतानां प्रकृतिस्तस्याः सकाशान् मोक्षं मोक्षोपायं ध्यानादिकं च ये विदुः ते परं पदं यान्ति ॥ ३४ ॥

विविक्तौ येन तत्त्वेन मिश्रौ प्रकृति-पुरुषौ ।
तं वन्दे परमानन्दं नन्द-नन्दनम् ईश्वरम् ॥

इति श्रीश्रीधरस्वामिकृतायां भगवद्गीताटीकायां सुबोधिन्यां प्रकृतिपुरुषविवेकयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

**विश्वनाथ**: अध्यायम् उपसंहरति क्षेत्रेण सह क्षेत्रज्ञयोर् जीवात्म-परमात्मनोर् अन्तरं भेदं तथा भूतानां प्राणिनां प्रकृतेः सकाशान् मोक्षं मोक्षोपायं ध्यानादिकं च ये विदुस्ते परं पदं यान्ति ॥ ३४ ॥

द्वयोः क्षेत्रज्ञयोर् मध्ये जीवात्मा क्षेत्र-धर्म-भाक् ।
बध्यते मुच्यते ज्ञानादित्यध्यायार्थ ईरितः ॥
इति सारार्थ-वर्षिण्यां हर्षिण्यां भक्त-चेतसाम् ।
त्रयोदशोऽयं गीतासु सङ्गतः सङ्गतः सताम् ॥

**बलदेवः** अध्यायार्थम् उपसंहरन् तज्-ज्ञान-फलम् आह क्षेत्रेति । क्षेत्रेण सहितयोः क्षेत्रज्ञयोर् जीवेशयोर् एवं मद्-उक्ति-विधयाआन्तरं भेदं ज्ञान-चक्षुषा वैधर्म्य-विषयक-प्रज्ञा-नेत्रेण ये विदुस् तथाभूतानां प्रकृतेः सकाशान् मोक्षं च तत्-साधनम् अमानित्वादिकं ये विदुस्ते प्रकृतेः परं सर्वोत्कृष्टं परव्योमाख्यं मत्-पदं यान्तीति ॥ ३४ ॥

जीवेशौ देह-मध्यस्थौ तत्राद्यो देह-धर्म-युक् ।
बध्यते मुच्यते बोधादिति ज्ञानं त्रयोदशात् ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥